चेत्। न भेदकल्पनायाश्चांत्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात्। आकाशादीनामपि विभुत्वं ब्रह्मवादिनोऽसिद्धं कार्यत्वाभ्यु
पगमात्। तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धं॥५३॥ ॥इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वि
तीयस्याध्यायस्य तृतीयः पादः॥३॥ तथा प्राणाः॥ वियदादिविषयः श्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृतः। चतुर्थेनेदानीं प्राण
विषयः परिहृयते। तत्र तावत्तत्तेजोऽसृजत। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामु

त्वविन्नसिद्धिनिबंधनाव्यवस्थां व्याविनाशे उपपत्त्यानुकूपादिविषयवर्त्मत्यत । असत्यां तु नरूपपत्तेः । कामं मा भूद्भिन्नत्वेनैतदुपरूपवे
वर्त्म । प्राप्नोति तु व्यवस्था हेतुमीवाद्यतिकरः । कार्यादीनामपि यदेकेनात्मनामनः संयुज्यते तदात्मांतरैरपि नात्मायचकः संयोगस्यात्मसं
निधानाद्विशेषात् तत्तत्सूर्हेतुविशेषाल्पनाविरोधः यदि तेषांस्यात्मनः सुखदुःखसंयोगे सर्वात्मनामेव समानं सुखदुःखत्वं प्रसज्येत । सा
देतदद्दष्टानिमित्तो नियमो भविष्यतीति नेत्साहुः । अदृष्टो नियमात् । बहुशात्मसु सर्वगतेषु प्रतिशरीरं बाह्याभ्यंतरा विशेषतः सन्निहितेषु
मनोभावानाकृपर्यायमलहराः । महदप्युपार्ज्यते । संख्यातांताये न्नदनात्मसमवायिप्रधानवर्जं प्रधानसाधारणो ह्यप्रसात्मसुखदुःखोप भो
गस्य नियामकमुपपद्यते । कालादीनामपि सर्वं वत्साधारणो नात्ममनःसंयोगेन निर्वर्तितस्याऽदृष्टस्यैवात्मनः एनम् दृष्टमिति नियमस्त्व म्य
भावादेवम् एवं दोषः स्याद् एतदस्मिन् फलं प्राप्नुवानिदं परिहराणि इत्थं प्रयतेऽहं करवाणि इति विविधा अभिसंध्यादयः प्रत्यात्मं प्रवर्तमानाः
अदृष्टस्यात्मनां व्यवस्थामिमां नियंस्यं तिति नेत्साहुः । अभिसंध्यादिष्वपि चैवं । अभिसंध्यादीनामपि साधारणो नेवात्ममनःसंयोगेन सर्वा
त्मसन्निधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषंग एव । प्रदेशादिति चेन्न तदभावात् । अथ यद्यपि विभुत्वेनात्मनः शरी
रपरिच्छिन्नमनसा संयोगः शरीराविच्छिन्न एवात्मप्रदेशमवविष्यति । प्रदेशकृता व्यवस्था भिसंध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष राघ्य.
तीति तदपि नोपपद्यते । कस्मादं तदभावात् विभुत्वाद्विशेषादिति सर्वदेवात्मानः सर्वशरीरसंबंधेन वर्तंते तेनैव देशविशेषे शरीरावच्छिन्नो ह्यात्मप्रदेशः ७१

फ.क स्वामिनः

ढ१ अतक्ष ५

हारादेव कुसुमपात्प्यात्मनो देहविशेषयोगात् । यस्त्वयं कर्मफलसंबंधः स चैकत्वमप्युपगम्य व्यतिकीर्येत तत्साम्यं कृत्वा क्षिति चेत्तानैतदेवं प्रसज्यते नै
मित्तिकत्वेन मी कर्तृत्वात्मनः संततः सर्वैः शरीरैः संबंधो नित्योपपादितं योऽहिंसाविरसः उपाधिसंतानाइवात्मनिजीवसंतानः तत्स्वकर्मव्यतिकरः फलव्य
तिकरो वा न भविष्यति ॥ आभास एव च ॥ आभास एव चैव जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः न स एव साक्षान्नापि वस्त्वंतरं । अतश्च
यथा नैकस्मिन् जलसूर्यके कंपमाने जलसूर्यकांतरं कंपते एवं नैकस्मिन् जीवे कर्मफलसंबंधिनि जीवांतरस्य तत्संबंधः एवमव्यतिकर एव
कर्मफलयोः आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोप घु
३ पत्तिः येषां तु बहव आत्मानः ते च सर्वे सर्वगताः तेषामेवैष व्यतिकरः प्राप्नोति । कथं बहवो विभवश्चात्मानः चैतन्यमात्रस्वरूपा निर्गुणा निरतिश न्म
याः तदर्थं साधारणं प्रधानं तन्निमित्तो भोगापवर्गाविति सांख्याः सति बहुत्वे विभुत्वे च घटकुड्यादिसमा द्रव्यमात्रस्वरूपाः स्वतोऽ
चेतना आत्मानः तदुपकरणानि चाणूनि मनांसि अचेतनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगात् नव विशेषगुणा इच्छादयो वैशेषिका आत्मगुणा उत्पद्यंते
ते चाव्यतिरेकेण प्रत्येकमात्मसु समवयंति स संसारः तेषां नवानामात्मगुणानामत्यंतानुत्पादो मोक्ष इति काणादाः तत्र सांख्यानां तावत्
चैतन्यस्वरूपत्वात् सर्वात्मनां सन्निधानाद्यविशेषाच्च एकस्य सुखदुःखसंबंधे सर्वेषां सुखदुःखसंबंधः प्राप्नोति स्यादेतत् प्रधानप्रवृत्तेः पु
रुषकैवल्यार्थत्वात् व्यवस्था भविष्यति । अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात् तथा च अनिर्मोक्षः प्रसज्येतेति नैतत् सारं न ह्य[illegible] भि

दृ१

ब्री.
७०

चमुपसेवितव्यमित्यनुज्ञा शत्रुः परिहर्तव्य इति परिहारः एवंप्रकारावनुज्ञापरिहारावेकत्वेप्यात्मनो देहसंबंधात्स्यातां देहैः संबंधो देहसंबंधः
कः पुनर्देहसंबंधः देहादिरयं संघातोहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः दृष्टा च सा सर्वप्राणिनामहं गच्छाम्यहमागच्छाम्यहमंधोहमनंधोऽ ठो
हं मूढोहममूढ इत्येवमात्मिका। न ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति प्राक्तु सम्यग्दर्शनात्प्रततैषा भ्रांतिः सर्वजंतुषु तदेवमविद्यानिमित्तदे
हाद्युपाधिकृताद्विशेषादैकात्म्याभ्युपगमेप्यनुज्ञापरिहाराववकल्प्येते सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं नातस्य कृ
तार्थत्वात्तन्नियोज्यत्वानुपपत्तेः हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात् आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्त्वपश्यन्कथं नि
युज्येत न चात्मात्मन्येव नियोज्यः स्यात् शरीरव्यतिरेकदर्शिन एव नियोज्यत्वमिति चेन्न तत्संहतत्वाभिमानात् सत्यं व्यतिरेक
दर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत एवात्मनो नियोज्यत्वाभिमानः न हि देहाद्यसंहतत्वदर्शिनः कस्यचिदपि नि
योगो दृष्टः किमुतैकात्म्यदर्शिनः न च नियोगाभावात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसंगः सर्वत्राभिमानस्यैव प्रवर्तकत्वादभिमानाभावाच्च
सम्यग्दर्शिनः तस्माद्देहसंबंधादेवानुज्ञापरिहारौ ज्योतिरादिवत् यथा ज्योतिष एकत्वेप्यग्निः क्रव्यात्परिह्रियते नेतरः यथा च प्रकाश एकस्या २
पि सवितुरमेध्यप्रदेशसंबद्धः परिह्रियते नेतरः शुचिभूमिष्ठः तथा भौमाः प्रदेशा वज्रवैडूर्यादय उपादीयंते भौमा अपि संतो नरकलेवरा राम.
दयः परिह्रियंते तथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते तदेव जात्यंतरे परिवर्ज्यते तद्वत्॥ असंततेश्चाव्यतिकरः॥ स्यातां नामानुज्ञापरि ७०

ध५ तावत्।

ति पादवंतिवेदवादास्तत्र मस्तीत्येवमादयः। तस्माद्भ्रांतिनैवेन दुःखेन परमात्मनो दुःखित्वप्रसंगः॥ स्मरंति च॥ स्मरंति च व्यासादयो य
था न जीवेन दुःखेन परमात्मा दुःखायत इति। तत्र यः परमात्मा स हि नित्यो निर्गुणः स्मृतः॥ न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा॥ कर्मात्मा त्वप
रो यो ऽसौ मोक्षबंधैः स युज्यते। स सप्तदशकेनापि राशिना युज्यते पुनरिति। चशब्दात्समामनंति चेति वाक्यशेषः। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न
न्यो ऽभिचाकशीति। एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति च श्रुतिः। यदि तर्ह्येक एव सर्वेषां भूतानामंतरात्मा
स्यात्कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ चेति। ननु चांशो जीव ईश्वरस्येत्युक्तं। तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्यतिकीर्णावुप
पद्येते किमत्र चोद्यत इति। उच्यते नैतदेवमनंशत्वमपि हि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयंति तत्सृष्ट्वा तदेवानुप्राविशन्नान्यो
तो ऽस्ति द्रष्टा मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति तत्त्वमस्यहं ब्रह्मास्मीत्येवंजातीयकाः। ननु भेदाभेदावगमाभ्यामंशत्वं प्रसिध्य
तीत्युक्तं। स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्यातां अभेद एव त्वत्र प्रतिपिपादयिषितः। ब्रह्मात्मत्वप्रतिपत्तौ हि पुरु
षार्थसिद्धेः स्वभावप्राप्तस्तु भेदो ऽनूद्यते न च निरवयवस्य ब्रह्मणो मुख्यो ऽंशो जीवः संभवतीत्युक्तं। तस्मात्पर एवैकः सर्वेषां भूतानामंतरा
त्मा जीवभावेनावस्थित इत्यतो वक्तव्यानुज्ञापरिहारोपपत्तिः। तां ब्रूमः। अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत्॥ ऋतौ भार्यामु
पेयादित्यनुज्ञा गुर्वंगनां नोपगच्छेदिति परिहारः। तथाग्नीषोमीयं पशुं संज्ञपयेदित्यनुज्ञा न हिंस्यात्सर्वा भूतानीति परिहारः। एवं लोकेपि

न १ इ ५ तृ २ अ २

नामरूपप्रकरेण निर्वर्त्तितेन्यर्थः १ दुःखस्यैवेत्स्यर्थः २

गी. नतु खेन दुःखमहमिति स्वविद्याकृते दुःखोपभोगमभिमन्यते। नैवं परमेश्वरस्य देहाद्यात्मभावाभावेन दुःखाभिमानो वास्ति। जीवस्याप्यविद्या
६९ कृतनामरूपनिर्वर्त्तितदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोऽस्ति। यथा च स्वदेहगतदाहच्छेदादिनिमित्त
दुःखं तदभिमानभ्रान्त्यानुभवति तथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानुभवत्यहमेव पुत्रोऽहमेव मित्रमित्येवं स्नेहवशेन
पुत्रमित्रादिष्वभिनिविशमानः। ततश्च निश्चितमेतदवगम्यते। मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति। व्यतिरेकदर्शनाच्चैवमव
पु गम्यते। तथा हि पुत्रमित्रादिमत्सु बहुषूपविष्टेषु तत्संबंधाभिमानेषु (?) पुत्रो मृतो मित्रं मृतमिति चैवमा[...]षिते ये पूर्वमेव पुत्रादि दि भा
मत्ताभिमानास्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकादीनां। अतश्च लौकिकस्यापि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं कि-
मुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति। तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसंगः। प्रकाशादिवदिति निद-
र्शनोपन्यासः। यथा प्रकाशः सौर्यश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबंधात्तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भा-
वमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते। यथा वाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति। यथा
चोदशरावादिकम्पनात्तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान्सूर्यः कम्पते। एवमविद्याप्रत्युपस्थापिते बुद्ध्याद्युपहिते जीवाख्येंऽशे दुःखायमा-
नेऽपि न तद्वानीश्वरो दुःखायते। जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तं। तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्र रामः ६९

मा उत वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः इति। सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदा
स्त इति नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिभ्यश्च। स्यादेतस्यार्थस्य सिद्धिः चैतन्यं चाविशिष्टं जीवेश्वरयोः यथाग्निविस्फुलिंगयोरौष्ण्यं अतो भेदाभेदाव
गमाभ्यामंशत्वावगमः कुतश्चांशत्वावगमः॥ मंत्रवर्णात्॥ मंत्रवर्णश्चैतमर्थमवगमयति। तावानस्य महिमा ततो ज्यायांश्च पूरुषः।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति। अत्र भूतशब्देन जीवप्रधानानि स्थावरजंगमानि निर्दिशति। अहिंसन्सर्वभूतान्यन्यत्र ती
र्थेभ्य इति प्रयोगात्। अंशः पादो भाग इति चानर्थांतरं। तस्मादप्यंशत्वावगमः। कुतश्चांशत्वावगमः॥ अपि च स्मर्यते॥ ईश्वरगीतास्वपीश्वरा च
शत्वं जीवस्य स्मर्यते। ममैवांशो जीवलोके जीवभूतः सनातन इति। तस्मादप्यंशत्वावगमः। यत्तूक्तं स्वामिभृत्यादिष्वेवेशित्रीशितव्यभावो
लोके प्रसिद्ध इति यद्यप्येषा लोके प्रसिद्धिः तथापि शास्त्रात्त्वंशांशित्वं ईशित्रीशितव्यभावश्च निश्चीयते। निरतिशयोपाधिसंपन्नश्चेश्वरो नि
हीनोपाधिसंपन्नान्जीवान्प्रशास्तीति न किंचिद्विप्रतिषिध्यते। अत्राह ननु जीवस्येश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखेनांशिनो
ईश्वरस्यापि दुःखित्वं स्यात् यथा लोके हस्तपादाद्यन्यतमांगगतेन दुःखेनांगिनो देवदत्तस्य दुःखित्वं तद्वत्। ततश्च तत्प्राप्तानां महत्तरं
दुःखं प्राप्नुयात्। अतो वरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसंगः स्यादिति। अत्रोच्यते॥ प्रकाशादिवन्नैवं परः॥ य
था जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोऽनुभवतीति प्रतिजानीमहे। जीवो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृते

कें २

मी. तिविहितकारिणाम पर्यनततत्स्थ्रुपामाप्तपवेदसात्तमियादीश्वरस्य वास्तंता न पेहते लौकिकस्यापि पुरुषकारस्य वैयर्थ्यं॥ तयोदेशकालनिमि
६८ त्तानां श्रवौ॰ दोषप्रसंगश्चेत्येवंजातीयकदोषजातमप्रत्यूहमेतेन दर्शयति॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥
जीवेश्वरयोरुपकार्योपकारकभाव उक्तः। स च संबन्धयोरेव दृष्टो लोके यथा स्वामिभृत्ययोर्यथाग्निविस्फुलिंगयोः। ततश्च जीवेश्वरयोरप्यु
पकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत्संबन्ध आहोस्विदग्निविस्फुलिंगवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति।
अथवा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबन्ध इति प्राप्ते अतो ब्रवीति अंश इति। जीव ईश्वरस्यांशो भवितु
मर्हति यथाग्नेर्विस्फुलिंगः। अंश इवांशः। न हि निरवयवस्य मुख्योंऽशः संभवति। कस्मात्पुनर्निरवयवत्वात्स एव न भवति। नानाव्यपदेशात्।
सोऽन्वेष्टव्यः स विजिज्ञासितव्यः। एतमेव विदित्वा मुनिर्भवति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति चैवंजातीयको भेदनिर्देशो नास
ति भेदे युज्यते। ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इत्यत आह। अन्यथा चापीति। न च नानाव्यपदेशादेव केवलादंश
त्रप त्वप्रतिपत्तिः। किं तर्हि। अन्यथा चापि च व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः। तथा ह्येके ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा उतेत्यादिना। दाशा य एते कैवर्ता प
प्रसिद्धा ये चामी दासाः स्वामिष्वात्मानमुपक्षपयंति। ये चान्ये कितवा द्यूतकृतः। ते सर्वे ब्रह्मैवेति हीनजंतूदाहरणेन सर्वेषामेव नाम राम.
रूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह। तथान्यत्रापि ब्रह्मप्रक्रियायामयमेवार्थः प्रपंच्यते। त्वं स्त्री त्वं पुमानसि त्वं कु ६८

खिनो दाशकितवादिभावं ब्रह्मण आमनंत्याथर्वणिका ब्रह्मसूक्ते ब्रह्म दाशा २

दिषु कर्मसु तेष्वीश्वरः कारणत्वेन प्रसिद्धः तथापि सर्वोस्य वशवर्ति पुरुष ईश्वरो हेतुकर्त्रैति तिष्ठते रवसीयते तथा हि श्रुतिर्भवति । एष ह्येव साधु कर्म कार
यति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति पश्चात्त्वमनिति ष्ठत्वा त्वा नवेत तेपमधतीति वेको
तोपकान्नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातां तो ऽप्यहृता ष्वामगमञ्ज नीवस्पतिनेस्फुयाते ॥ कृतप्रयत्ना पेक्षस्तु विहितप
तिषिद्धासेवपर्यादिभ्यः तु शब्दः त्रोदितदोषव्यावर्तनार्थः कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणः तदपेक्ष एवैनमीश्वरः कारयति । अत्र तस्यै
ते वोदितदोषाः न प्रसज्यन्ते जीव कृत धर्माधर्म वैषम्यापेक्ष एव तत्फलानि विषमं विभजेत् पर्जन्य वदीश्वरो निमित्तमात्रेण यथा लोके ल
नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चासाधारणेभ्यः स्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः न ह्यसति पर्जन्ये
रसपुष्पफलपलाशादि वैषम्यं तेषां जायते नाप्यसत्सु स्वबीजेषु एवं जीव कृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्यादिति श्लिष्यते ननु
कृतप्रयत्नमपेक्षमाणस्य परापेक्षत्वे न ते पपद्यते नैष दोषः परायत्ते पि हि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमीश्वरः कारयति अपि च पूर्व
प्रयत्नमपेक्षेदानीं कारयति पूर्वतरं च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात्संसारस्येत्यनवद्यं कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ई
श्वर इति । विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह एवं स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य इत्येवं जातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं
भवति । अन्यथा तदनर्थकं स्यात् ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वाज्जीवस्य तथा विहितकारिणमप्यनर्थेन संसृजेत्स

मी.
६०

करणात्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात्। तस्मात्कर्तृत्वम
प्यात्मन उपाधिनिबंधनमेवेति सिद्धं। परात्तु तच्छ्रुतेः। यदिदमविद्यावस्थायामुपाधिनिबंधनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं
भवत्याहोस्विदीश्वरापेक्षमिति भवति विचारणा। तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति। कस्मादपेक्षाप्रयोजनाभावात्।
अयं हि जीवः स्वयमेव रागद्वेषादि प्रयुक्तः कारकांतरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति न च लो
के प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुहादिवदीश्वरोऽपरोऽपेक्षितव्य इति। क्लेशात्मकेन च कर्तृत्वेन जंतून्संसृजत ईश्वरस्य नै
र्घृण्यं प्रसज्येत विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यं। ननु वैषम्यनैर्घृण्ये न सापेक्षत्वादित्युक्तं सत्यमुक्तं सति त्वीश्वरस्य सा
पेक्षत्वे संभवे सापेक्षत्वं चेश्वरस्य संभवति सतोर्जंतूनां धर्माधर्मयोः। तयोश्च सद्भावः सति जीवस्य कर्तृत्वे। तदेव चेत्कर्तृत्वमीश्व
रापेक्षं स्यात्। किंविषयमीश्वरस्य सापेक्षत्वमुच्येत। अकृताभ्यागमश्च जीवस्य प्रसज्यते। तस्मात्स्वत एव जीवस्य कर्तृत्व
मिति। एतां प्राप्तिं तुशब्देन व्यावर्त्य प्रतिजानीते परादिति। अविद्यावस्थायां कार्यकारणसंघाताविवेकदर्शिनो जीवस्याविद्या
तिमिरांधस्य सतः परस्मादात्मनः कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसार
स्य सिद्धिः तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षस्य सिद्धिर्भवितुमर्हति। कुतः तच्छ्रुतेः। यद्यपि दोषप्रयुक्तः सामग्रीसंपन्नश्च जीवः यद्यपि च लोके कृष्या

संभवे यदुक्तं तदुपपन्नं भवतीत्यर्थः

राम.
६०

नमिति। कामाद्यथ्यमनसो रत्नयतीति श्रुतिः। तां स्वप्ने हस्यं तेन तन्मात्समनाए दस्वप्ने विहरति। विहारोपि वत्तत्वो वासनामय एव ननु
पारमार्थिकोस्तितया वस्तुनि रिवकारानुकूलमेव स्वप्ने व्याकर्णयति। उतेव स्त्रीभिः सह मोदमानो हसन्नुतेवापि भयानि पश्यन्निति। लोक
कोऽपि तथैव स्वप्ने रूपयति। आरूढं हस्तिनमिव गिरिशृंगमङ्गानामिव वनराजिमिति। तथोपादाने य[illegible] ए विक्रियरो भूत्कर्मकरणादिमत्विनिर्दि
शत्यापि तत्संबन्धस्यैवात्मनः कर्तृत्वे दृष्टव्येकवचनेकर्तृत्वात्सर्वस्य दर्शनत्वात्। भवति वलोके अनेकधा कारा विवक्षायां कथं प्रयुज्यते। योवै
राजोभ्युध्यत इति च। अपि चात्मिनुपादाने करणव्यापारोपरमामात्रं विवक्षते। न स्वातंत्र्यं कस्य चिदित्युक्तिरेवं कस्यापि स्वात्मकरणव्यापारो
परमस्य हेतुत्वात्। पत्त्वयं व्यपदेशो दर्शितः। विज्ञानं यज्ञं तनुत इति। स च कर्तृत्वं प्रापयति। विज्ञानशब्दस्य तत्र प्रसिद्धत्वात्। मनो
नेतरपात्रवत्तस्य श्रद्धैव शिर इति च विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसंकीर्तनात् श्रद्धादीनां च बुद्धिधर्मत्वप्रसिद्धेः। विज्ञानं देवाः
सर्वे ब्रह्म ज्येष्ठमुपासत इति च वाक्यशेषात्। ज्येष्ठत्वस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात्। स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यत्तरति
च यज्ञस्य नरपत्तस्य वाग्बुद्धिसाध्यत्वावधारणात्। न च शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमेन भवति। सर्वेषां कारकाणामेव स्व
व्यापारेषु कर्तृत्वस्यावश्यंभावित्वादुपलब्ध्यपेक्षत्वेयां करणानां त्वासा वात्मनः। न च तस्याप्यस्य कर्तृत्वमस्ति। नित्योपलब्धिस्वरू
पत्वात्। अहंकारस्य कर्तृत्वमपि कर्तृत्वेनोपजनयितुं न वितुम इति। अहंकारस्याप्युपलभ्यत्वात्। न चैवं सति करणान्तरकल्पना प्रसंगः बुद्धेः

शुद्धस्य

मात्र १

कर्तृत्वेन

गी.
६६

मापत्तुन्नयस्वमात्मानं परं ब्रह्म विश्वविमुक्तकार्यकरणसंघातोऽकर्त्ता सुखी भवति सेयं दर्शदवस्थायो तथा तु न्नवस्थापामप्यविशेषां
ते विद्याप्रदीपेन विश्रुत्यात्मैव केवलो निर्द्वंद्वः सुखी भवति । तत्र हृष्टांतश्चैतवतो शेनइत्यत्र । तत्रा हि विशिष्टहेतुत्वन्नरणादिष्णुव्यापारेषपे
ह्येव वर्तिनियतानि करणानि वाक्पादीनि कर्त्तृणी भवति स्वशरीरेणात्वकर्त्ता एवमयमात्मा सर्वव्यापारेषपेक्षैव मनस्यादीनि करणानि कि
र्त्री भवति स्वात्मनात्वकर्त्तेति । नत्वात्मनस्तन्त्रगाइवावयवाः संतिये ह्स्तादिनि रिवव्यापारयानि तत्रामनश्चाशक्तिकरणान्यालंब्याइदीन
न्यस्येदाधयत्तनेसान्वार्थवतादिर्निर्हेतुकिः स्वाभाविकमात्मनः कर्तृत्वमिति । तत्र विधिशास्त्रं तावद्दाप्यात्मनं कर्तृत्वमुपादायकर्त्तृव्यविशेष
मुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति । न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मैषोऽपदेशादिति वो वाम्मानत्वादविद्यकृतं कर्तृत्वमुपा
दाय विधिशास्त्रं प्रवर्त्तिष्यते । कर्त्ता विज्ञानात्मा पुरुषः इत्येवं जातीयकमपि शास्त्रमनुवादरूपत्वाद्यथापाप्तमेवाविद्याकृतं कर्तृत्वमनुवद
त्यतिरेतेन विहारोपादानेपरिहृतौ तयोरप्यनुवादरूपत्वात् ननु संध्ये स्थाने प्रभुमेषुकरणेषु स्वेशरीरे यथाकामं परिवर्त्तत इति विहारमुपदि
श्यमानः केवलस्यात्मनः कर्तृत्वमावहति तत्रोपादाने वितदेव प्राणानामादाय तिस्मानेन विज्ञानमादायेति करणेषु कर्मकरणा विभक्ती
श्रूयमाणेन केवलस्यैवात्मनः कर्त्तृत्वं गमयतइति चेन्नोच्यते । न तावत्संध्ये स्थाने संतमात्मनः करणाविरमणमस्ति स्वधीः स्वप्नो भूत्वेमं राम·
लोकमतिक्रामतीत्यादिनात्रैव धीसंबंधश्रवणात् । तथाच स्मरन्ति इंद्रियाणामुपरमे मनोऽनुपरतं यदि सेवते विषयानिवत हि धीः स्वप्नदर्शं ६६

स्वप्नेकुक्रोऽ२

यदा

स्वप्नान्तस्यानित्यत्वात् । अपि चानित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षत्वसिद्धिः । तान्यात्मप्रतिपादने च न स्वाभाविकं कर्तृ
त्वं वक्तुं शक्यते । तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकं । तथा च श्रुतिर्ध्यायतीव लेलायतीवेत्याद्युपमानो
पन्यासेन त्याज्यं कर्म [illegible]नी विरामइति वा पाषिलेपञ्चस्यैवात्मनोऽत्वात् । नहि कर्मादिविशेषलाभं दर्शयति नहि विवेकितं परस्माद्योतीयो
नाम कर्ता भोक्ता वा विद्यते नान्योऽतोऽस्ति द्रष्टा दिव्य वेत्याता । परस्मादन्यः संसारी कर्ता भोक्ता वा प्रसज्येत परस्मादन्यस्य द्वितीयाभावात् बुद्ध्यादिसंघात
व्यतिरिक्तो न स्यात् । न [illegible] विद्याप्रत्युपस्थापितत्वात् कर्तृत्वभोक्तृत्वयोः । तथा च शास्त्रं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । सविद्याव
स्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां तत्र एव कर्तृत्वभोक्तृत्वे निवारयति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति । तथा
स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृते श्रमं श्येनस्येवाकाशे विपरिपतितः श्राव यित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना संपरिष्वक्तस्य श्रा
वयति तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं [illegible] शोकान्तरमित्यारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक
एषोऽस्य परम आनन्द इत्युपसंहारात् । तदेतदाह याज्ञवल्क्यो यथा वतत्तो भवयेति । त्वं यत् वाधं वःपपठितः । नैवमं तत्र स्वाभाविकमेवात्मन
कर्तृत्वमग्रीषोमीयं विनिधिपानुलोकेतत्रानारणादस्माहस्माकर्ता दुःखी भवति । स एव स्वप्नसंस्थानो विप्रकृतवासनादिकरणाः स्व
[illegible]निर्वृतो निर्व्यापारः सुखी भवति । स्वप्नविद्याप्रत्युपस्थापितदैतसंस्थानस्यात्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति स तद्

यत एतादृशः श्रीः स यो एष ह रो [illegible]मात्मा भार्ये श्रावयितिः ३ त ५

अत्मागमादि २

मी· पद्येत। सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यं। अहंकरणं शरीरकार्या एवं प्रवृत्तेः सर्वेन्द्रियदर्शनात् तस्य
६५ हंगकामिश्रे हं जजे हं विजानामीति च। तस्माद् बुद्धेः कर्तृशक्तियुक्तायाः सर्वार्थकारिकरणमन्यत्कल्पयितव्यं शक्तोऽपि हि स कर्ता करणा द
न्युपादाय क्रियासु प्रवर्तमानो दृष्टस्तद्वदिति। ततश्च स एवात्मा ते विशेषवादः स्यात् [illegible] वर्त्मनि इदं कश्चिन्न करणमस्तीति तस्य कर्तृत्वा
भ्युपगमात्। समाधानमाह। योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः स्वभावविरूपदृष्टो वेदान्तेषु आत्मा [illegible]
तत्त्वोऽमन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति तेषां यदा आत्मानमित्येवं [illegible] सोपपत्तिः आत्मनः कर्तृ
ल त्वेनोपपद्येत। तस्मादप्यस्य कर्तृत्वसिद्धिः॥ यथा चेतनोऽमयथा। एवं तावद् बुद्ध्यादेर्चेतनत्वादिनिर्देशे तु किं कर्तृत्वं शास्त्र [illegible] दर्शितम्
ति नुनः स्वाभाविकं वास्यादुपाधिनिमित्तं वेति चिन्त्यते। तत्रैतेरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वं प्राप्तम् [illegible] त्वमावादि
सिवंप्राप्तेब्रूमः। न स्वाभाविकं कर्तृत्वमात्मनः संभवति अनिर्मोक्षप्रसंगात् कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः संभवति
अग्नेरिवौष्ण्यात्। न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात्। ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्य
परिहारात् पुरुषार्थः सेत्स्यति तत्परिहारश्च निमित्तपरिहारात्। यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभाववत्तद्वत्। न
निमित्तानामपि शक्तिलक्षणेन संबन्धेन संबद्धानामत्यन्तपरिहारासंभवात्। ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति। न। साधनाय राम·
६५

स्यात्किंतु स्वक्रियायाः कर्तृत्वं व्यपदिशति विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति। ननु विज्ञानशब्दो बुद्धौ समधिगतः करणव्युत्पत्त्या न जीव
स्य कर्तृत्वं सख्यते ति। नेत्युच्यते जीवस्य वैषनिर्देशो न बुद्धेः। अन्यथा जीवस्य स्यात् निर्देशविपर्ययः स्याद्विज्ञानेनेति वै निर्देशः स्यात् तथा य
स्य बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते। तद्यथा तं तौ विज्ञानमादाय वाति। इह तु विज्ञानं यज्ञं तनुत इति क
र्तृसामानाधिकरण्यनिर्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यते। अतः स्वतन्त्रः कर्ता जीवः। ननु बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स्वतन्त्रः
सन् प्रियं हितमेवैकात्मनो नियमेन संपादयेत्। न विपरीतं विपरीतमपि तु संपादयन्नुपलभ्यते। न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिर नियमेनो
पपद्यत इति। अत उत्तरं पठति। उपलब्धिवदनियमः। यथाऽयमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते एवमनियमे
नैवेष्टमनिष्टं च संपादयिष्यति। उपलब्धावप्यस्वातन्त्र्यमुपलब्धिहेतूपादाना॰॰॰दिति चेत्। न। विषयप्रकल्पनमात्रप्रयोजन
त्वादुपलब्धिहेतूनाम्। उपलब्धौ स्वतन्त्रः। अपि चात्मनोऽन्यत्र योगात्। अर्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति दे
शकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते। भवति ॰॰ऽप्येधोदकाद्यपे॰॰॰स्यापि पक्तुः पक्तृत्वं स
हकारिवैचित्र्याच्चेष्टानिष्ट॰॰क्रियाप्रवृत्तौ नियमेन प्रवृत्तिरात्मनो न विरुध्यते। शक्तिविपर्ययात्। इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता
भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात् ततः शक्तिविपर्ययः स्यात्। करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चा

मि.
६४

५३

थ सत्यपि हेतुसमवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्येत न चैवं दृश्यते। अथवान्यतरस्यात्मन इंद्रियस्य वा श
क्तिप्रतिबंधोऽभ्युपगंतव्यः। न चात्मनः शक्तिप्रतिबंधः संभवत्यविक्रियत्वात्। नापींद्रियस्य न हि तस्य पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्ति
कस्य सतोऽकस्माच्छक्तिः प्रतिबध्येत। तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः। तथा च श्रुतिः। अन्यत्रमना
अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोतीति। कामादयश्चास्य वृत्तय इति द
र्शयति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति। तस्माद्युक्तमेतत्तद्गुणसारत्वात्तु तद्व्यपदेश
इति॥ कर्ता शास्त्रार्थवत्वात्। तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपंच्यते। कर्ता चायं जीवः स्यात्। कस्मात्। शास्त्रार्थवत्वात्।
एवं च यजेत जुहुयाद्दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति। अन्यथा तदनर्थकं स्यात्। तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति।
न चासति कर्तृत्वे तदुपपद्यते। तथेदमपि शास्त्रमेवमर्थवद्भवति। एष हि द्रष्टा श्रोता मंता बोद्धा कर्ता विज्ञानात्मा पुरुष इति। विहारोप
देशात्। इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां संध्ये स्थाने विहारमुपदिशति। स ईयतेऽमृतो यत्र काममिति। स्वे शरीरे यथाकामं
परिवर्ततेति च॥ उपादानात्। इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति। तदेषां प्राणानां विज्ञानेन विज्ञा राम.
नमादायेति। प्राणान्गृहीत्वेति च॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः। इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु ६४

२५ ए। २

मिथ्याज्ञानस्यसम्यग्ज्ञानादन्यत्रनिवृत्तिरस्तीति।अतोयावद्ब्रह्मात्मतानवबोधस्तावदयंबुद्ध्युपाधिसंबंधोनशाम्यति।दर्शयति
च।वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात्।तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेति।ननुसुषुप्तप्रलययोर्नश
क्यतेबुद्धिसंबंधआत्मनोऽभ्युपगंतुं।सतासोम्यतदासंपन्नोभवतिस्वमपीतोभवतीतिवचनात्कृत्स्नविकारप्रलयाभ्युपगमाच्च।तत्कथंयावदा
त्मभावित्वंबुद्धिसंबंधस्येति।अत्रोच्यते॥पुंस्त्वादिवत्त्वस्यसतोऽभिव्यक्तियोगात्।यथालोकेपुंस्त्वादीनिबीजात्मनाविद्यमानान्येव
बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानियौवनादिष्वाविर्भवंति।नाविद्यमानान्युत्पद्यंतेषंढादीनामपितदुत्प
त्तिप्रसंगात्।एवमयमपिबुद्धिसंबंधःशक्त्यात्मनाविद्यमानएवसुषुप्तप्रलययोःपुनःप्रबोधप्रसवयोराविर्भवति।एवंह्येतद्युज्यते।नह्या
कस्मिकीकस्यचिदुत्पत्तिःसंभवत्यतिप्रसंगात्।दर्शयतिचसुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं।सतिसंपद्यनविदुःसतिसंपद्य
महइति।तइहव्याघ्रोवासिंहोवेत्यादिना।तस्मात्सिद्धमेतद्यावदात्मभावीबुद्ध्याद्युपाधिसंबंधइति॥नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनिय
मोवान्यथा॥तच्चात्मनउपाधिभूतमंतःकरणंमनोबुद्धिर्विज्ञानंचित्तमितिचानेकधातत्रतत्राभिलप्यते।क्वचिच्चवृत्तिविभागेनसंशया
दिवृत्तिकंमनइत्युच्यतेनिश्चयादिवृत्तिकंबुद्धिरिति।तच्चैवंभूतमंतःकरणमवश्यमस्तीत्यभ्युपगंतव्यम्।अन्यथाह्यनभ्युपगम्यमा
नेतस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसंगःस्यात्।आत्मेंद्रियविषयाणामुपलब्धिसाधनानांसंनिधानेसतिनित्यमेवोपलब्धिःप्रसज्येत।

मी. तद्वत्। स्यादेतद्यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यंभावीत्यतो बुद्धिवियो
६३ गे सत्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेति। अत उत्तरं पठति॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ नेयमनंत
रनिर्दिष्टदोषप्राप्तिराशंकनीया। कस्मात्। यावदात्मभावित्वाद्बुद्धिसंयोगस्य। यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन
संसारित्वं न निवर्तते तावदस्य बुद्ध्या संयोगो न शाम्यति। यावदेव चायं बुद्ध्युपाधिसंबंधस्तावदेव जीवस्य जीवत्वं संसारित्वं च।
परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात्सर्वज्ञादीश्वरादन्यश्चेतनो धातुर्द्विती
यो वेदांतार्थनिरूपणायामुपलभ्यते। नान्योतोस्ति द्रष्टा श्रोता मंता विज्ञाता। नान्यदतोस्ति द्रष्टृ श्रोतृ मंतृ विज्ञातृ। तत्त्वमसि। अहं ब्रह्मास्मीत्यादि
शा श्रुतिशतेभ्यः। कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति। तद्दर्शनादित्याह। तथा हि शास्त्रं दर्शयति। योयं विज्ञानमयः प्राणे
षु हृद्यंतर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेत्यादि। तत्र विज्ञानमय इति बुद्धिमयत्वं च तद्गुणसार
त्वमेवाभिप्रेयते। यथा लोके स्त्रीमयो देवदत्त इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत्। स समानः सन्नुभौ लोकावनुसंचरतीति च लोकांतरगम ज
नेप्यवियोगं बुद्ध्या दर्शयति। केन समानः। तयैव बुद्ध्येति गम्यते सन्निधानात्। तद्दर्शयति ध्यायतीव लेलायतीवेति। एतदुक्तं भवति। ना
यं स्वतो ध्यायति नापि चलति ध्यायंत्यां बुद्धौ ध्यायतीव चलंत्यां चलतीवेति। अपि च मिथ्याज्ञानपुरःसरोयमात्मनो बुद्ध्युपाधिसंबंधः। न च राम.
बुद्धिमय इत्येतदुक्तं भवति प्रदेशांतरे विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इति विज्ञानस्य मन आदिभिः सह पाठात् ४ ६२

[redacted]
नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् २१
गुणेनाराग्रमात्रो ह्यवरोऽपि दृष्ट इति पूरणीयं ... तु गुणेनेत्यस्य
वरणी बुद्धेर्गुणसेवेत्यर्थः ३

तयाचबालाग्रशतभागस्यशतधाकल्पितस्यतुभागोजीवःसविज्ञेयःसचानंत्यायकल्पतइति।अणुत्वंजीवस्योक्त्वातस्यैवपुनरानंत्यमाह।
तच्चैवमेवसमंजसंस्यात्।यद्यौपचारिकमणुत्वंमेवसार्वगत्यंचानंत्यं।नतत्त्वमर्थेणुत्वंमेवकल्पितं।नवानंत्यमौपचारिकमितिराख्यंविना
त्वंसर्वोपाधिषस्तुब्रह्मात्मभावस्यप्रतिपिपादयिषितत्वात्।तथेतरस्मिन्नपिश्रुतेऽणुत्वंनेऽबुद्धेर्गुणेनात्मगुणेनचैवाराग्रमात्रोह्यवरोऽपिदृष्टइतिबुद्धे
र्गुणसंबंधेनैवाराग्रमात्रत्वंशास्तिनस्वेनैवात्मना।एषोणुरात्माचेतसावेदितव्यइत्यत्रापिनजीवस्याणुपरिमाणत्वंशिष्यतेपरस्यैवा
त्मनश्चक्षुराद्यनवग्राह्यत्वेनज्ञानप्रसादगम्यत्वेनचप्रकृतत्वाज्जीवस्यापिचमुख्याणुपरिमाणत्वानुपपत्तेः।तस्मात्दुर्ज्ञानत्वाभिप्रा
यमिदमणुत्ववचनंउपाध्यभिप्रायंवाद्रष्टव्यं।तथाप्यतयाशरीरंसमारुह्यैवमेवंतासुरीयकेषुविभेदोपदेशेषुबुद्धेर्वोपाधिस्तयानी
ऽशरीरंसमारूह्यैवंयोजयितव्यं।व्यपदेशमात्रंवाशिलापुत्रकस्यशरीरमित्यादिवत्।नह्यत्रगुणागुणिविभागोविद्यतइत्युक्तं।
हृदयायतनत्ववचनमपिबुद्धेरेवतदायतनत्वात्।तथोत्क्रांत्यादीनामप्युपाध्यायत्ततांदर्शयति।कस्मिन्नहमुत्क्रांतउत्क्रांतोभविष्या
मिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजतेतिउत्क्रांत्यभावेहिगत्यागत्योरप्यभावोविज्ञायते।नह्यनपसृप्तस्यदेहादपा
गतिःस्यात्।एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशःप्राज्ञवत्यथाप्राज्ञस्यपरमात्मनःसगुणोपासनेषूपाधिगुणसारत्वा
दणीयस्त्वादिव्यपदेशः।अणीयान्व्रीहेर्वायवाद्वामनोमयःप्राणशरीरःसर्वगंधःसर्वरसःसत्यकामःसत्यसंकल्पइत्येवंप्रकारः

प२ स्तु ६ स्य ४

मी· चेद्ब्रह्म जीवस्तस्माद्यावत्परं ब्रह्म तावानेव जीवोपि विभुर्भवितुमर्हति। परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः तथा च स वा एष म
६२ हानज आत्मा योयं विज्ञानमयः प्राणेष्वित्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवंति। न चाणोर्जीवस्य सक
लशरीरगता वेदनोपपद्यते। त्वक्संबंधात्स्यादिति चेन्न कंटकतोदनेपि सकलशरीरगतैव वेदना प्रसज्येत त्वक्कंटकयोर्हि संयोगः कृत्स्नायां त्वचि व
त्र र्तते त्वक् च कृत्स्नशरीरव्यापिनीति। पादतल एव तु कंटकतुन्नो वेदनां प्रतिलभते। न चाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात्। गुणत्व
मेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभायाश्च द्रव्यांतरत्वं व्याख्यातं। गंधोपि गुणत्वाभ्युपगमात्स्वाश्रय एव संचरितुमर्हति। अ
न्यथा गुणत्वहानिप्रसंगात्। तथा चोक्तं द्वैपायनेन। उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणाः। पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमि
ति। यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयान्नाणुर्जीवः स्यात्। चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ नात्र गुणगुणिविभागो
विद्यत इति। शरीरपरिमाणत्वं च प्रत्याख्यातं। परिशेषाद्विभुर्जीवः। कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह तद्गुणसारत्वात्तु तद्व्यपदेश
इति। तस्या बुद्धेर्गुणाः तद्गुणाः इच्छा द्वेषः सुखं दुःखमित्येवमादयः। तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे संभवति तद्गुणसारस्त
द्भावस्तद्गुणसारत्वं। नहि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति। बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं रामः
संसारित्वमकर्तुरभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनः। तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशस्तदुत्क्रांत्यादि ६२

ते१ भिन्नास्योऽहंत्यादि व्यपदेशो न स्यात् ४ —— १

वस्य चैतन्यगुणव्यतिरेको भविष्यति। अतश्चानैकांतिकमेतत् तद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतो गंधस्याश्रयविश्ले
षदर्शनात्। गंधस्यापि सहैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसंगात्। तच्चाक्षीयमाणमपि तत्पूर्वावस्थातोऽवगम्यते
इतरथा पूर्वावस्थातो गुरुत्वादिभिर्हीयेत। स्यादेतत् गंधाश्रयाणां विश्लिष्टानामल्पत्वात्सन्नपि विशेषो नोपलक्ष्यते सूक्ष्मा हि गंधपरमाणवः स
र्वतो विप्रसृता गंधबुद्धिमुत्पादयंति नासिकापुटमनुप्रविशंत इति चेन्न। अतींद्रियत्वात्परमाणूनां स्फुटगंधोपलब्धेश्च नागकेसरादिषु न च लो
के घ्रातो गंध इति प्रतीतिर्गंधवद्द्रव्यमाघ्रातमिति। गंध एवाघ्रात इति लौकिकाः प्रतियंति। रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गंधस्याप्ययुक्त आश्रयव्यतिरे
क इति चेन्न प्रत्यक्षत्वादनुमानाप्रवृत्तेः। तस्माद्यद्यथा लोके दृष्टं तत्तथैवानुमंतव्यं निरूपकैर्नान्यथा। न हि रसो गुणो जिह्वयोपलभ्यत इत्यतस्त
नो रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियंतुं शक्यते॥ ॥ तथा च दर्शयति॥ हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय त
स्यैवालोमभ्य आनखेभ्य इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति॥ पृथगुपदेशात्॥ प्रज्ञया शरीरं समारुह्येति चात्मप्रज्ञयोः
कर्तृकरणभावेन पृथगुपदेशाच्चैतन्यगुणेनैवास्य शरीरव्यापिता गम्यते। तदेतेषां प्राणानां विज्ञानेन विज्ञानमादायेति च कर्तुः शारीरात्पृथग्वि
ज्ञानस्योपदेश एतमेवाभिप्रायमुपोद्बलयति तस्मादणुरात्मेति। एवं प्राप्ते ब्रूमः॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्॥ तुशब्दः पक्षं व्या
वर्तयति। नैतदस्त्यणुरात्मेति। उत्पत्त्यश्रवणाद्धि परस्यैव तु ब्रह्मणः प्रवेशश्रवणात्तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं। परमेव

उच्यते ५ ध ५

श्री. ६२ वैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ अत्राह यदुक्तमविरोधश्चंदनवदिति तदयुक्तं । दृष्टांतदार्ष्टांतिकयोरतुल्यत्वात् । सिद्धे ह्यात्मनो देहैकदेशवृ
त्तित्वे चंदनदृष्टांतोऽवकल्पेत । प्रत्यक्षं तु चंदनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं च । आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं
नैकदेशवर्तित्वं । अनुमेयं तदिति यदुच्येत न चात्रानुमानं संभवति किमात्मनः सकलशरीरगता वेदना त्वगिंद्रियस्येव सकलदेहव्यापिनः स
तः किं वा विभोर्नभस इव आहोस्विच्चंदनस्येवाणोरेकदेशस्थस्येति संशयानतिवृत्तिरिति । अत्रोच्यते । नायं दोषः । कस्मात् । अभ्युपगमात् । अभ्यु
पगम्यते ह्यात्मनोऽपि चंदनस्येव देहैकदेशवर्तित्वमवस्थितिवैशेष्यं । कथमिति । हृद्येष ह्यात्मा पठ्यते वेदांतेषु । हृदि ह्येष आत्मा । स वा एष आत्मा
हृदि । कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्याद्युपदेशेभ्यः । तस्माद्दृष्टांतदार्ष्टांतिकयोरवैषम्याद्युक्तमेवैतदवि
रोधश्चंदनवदिति ॥ गुणाद्वालोकवत् ॥ चैतन्यगुणव्याप्तेर्वाणोरपि सतो जीवस्य सकलदेहव्यापि कार्यं न विरुध्यते । यथा लोके मणिप्रदीपप्रभृ
तीनामपवरकैकदेशवर्तिनामपि प्रभापवरकव्यापिनी सती कृत्स्नेऽपवरके कार्यं करोति तद्वत् । स्यात् कदाचिच्चंदनस्य सावयवत्वात् सूक्ष्माव
यवविसर्पणेनापि सकलदेहाह्लादयितृत्वं न त्वणोर्जीवस्यावयवाः संति येरयं सकलं देहं विप्रसर्पेदित्याशंक्य गुणाद्वालोकवदित्युक्तं ।
कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते प्रदीपप्रभावद्भवेदिति चेन्न त
स्या अपि द्रव्यत्वाभ्युपगमात् । निविडावयवं हि तेजोद्रव्यं प्रदीपः प्रविरलावयवं तु तेजोद्रव्यमेव प्रभेति । अत उत्तरं पठति । व्यतिरेको गंधवत् ।
यथा गुणस्यापि सतो गंधस्य गंधवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गंधवत्सु कुसुमादिगंधोपलब्धेः एवमणोरपि सतो जी राम. ६२

स्वगंध १ तं १ तं ५

नू२

२ वमप्ययमात्मानाणुः स्यात् १ त१

णुत्वसिद्धिः॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥ अथापि स्यान्नाणुरयमात्मा कस्मात्तच्छ्रुतेः। अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः।
स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनन्तं ब्रह्म इत्येवंजातीयका हि श्रुतिरात्मनोऽणुत्वे विप्रति
षिध्येतेति चेत्। नैष दोषः कस्मादितराधिकारात्। परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः। परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदित
वाक्यात् व्यत्वेन प्रकृतत्वात्। विरजः पर आकाशादित्येवंविधाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात्। ननु योऽयं विज्ञानमयः प्राणेष्विति शारीरो महत्व
संबंधित्वेन प्रतिनिर्दिश्यते। शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववद्द्रष्टव्यः। तस्मात्प्राज्ञविषयत्वात्परिमाणान्तरश्रवणस्य न जीवस्याणुत्वं विरुध्यते।
स्वशब्दोन्मानाभ्यां च॥ इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते। एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पंचधा संविवेश
इति प्राणसंबंधाच्च जीव एवायमणुरभिहित इति गम्यते। तथोन्मानमपि जीवस्याणिमानं गमयति। बालाग्रशतभागस्य शतधा कल्पित
स्य च भागो जीवः स विज्ञेय इति। आराग्रमात्रो ह्यवरोऽपि दृष्ट इति चोन्मानान्तरं। ननु अणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्येत।
दृश्यते च जाह्नवीह्रदनिमग्नानां सर्वांगशैत्योपलब्धिः। निदाघसमये च सकलशरीरपरितापोपलब्धिरिति। अत उत्तरं पठति॥ अविरोधश्चन्दनवत्।
यथा हि हरिचन्दनबिन्दुः शरीरैकदेशसंबद्धोऽपि सन्सकलदेहव्यापिनमाह्लादं करोत्येवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करि
ष्यति। त्वक्संबंधाच्चास्य सकलशरीरगता वेदना न विरुध्यते। त्वगात्मनोर्हि संबंधः कृत्स्नायां त्वचि वर्त्तते त्वक्च कृत्स्नशरीरव्यापिनीति॥ अवस्थिति

र३ प

मी. माणा इति। ननु च नात्मोत्पद्यते नित्यचैतन्यश्चायमित्युक्तमतश्च पर एवात्मा जीव इत्यापतति। परस्य चात्मनोनंतत्वमाम्नातं तेन च कुतो
६. जीवस्य परिमाणचिंतावतार इति। उच्यते सत्यमेतत् उत्क्रांतिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयंति। स्वशब्देन चास्य क्वचिदणु
परिमाणत्वमाम्नायते। तस्य सर्वस्यानाकुलत्वोपपादनायायमारम्भः। तत्र प्राप्तं तावदुत्क्रांतिगत्यागतीनां श्रवणात् परिच्छिन्नो जीव इति। उत्क्रां
तिस्तावत् स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामतीति। गतिरपि ये वै के चास्माल्लोकात् प्रयंति चंद्रमसमेव ते सर्वे गच्छं
ति। आगतिरपि तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे इति। आसामुत्क्रांतिगत्यागतीनां श्रवणात् परिच्छिन्नस्तावज्जीव इति
प्नोति। न हि विभोश्चलनमवकल्पत इति। सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्य
ते। स्वात्मना चोत्तरयोः॥ उत्क्रांतिः कदाचिदचलतोपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्पेत न तूत्तरे
गत्यागती। नाचलतः संभवतः। स्वात्मना हि तयोः संबंधो भवति। गमेः कर्तृस्थक्रियत्वात्। अमध्यमपरिमाणस्य च गत्याग
ती अणुत्व एव संभवतः। सत्योश्च गत्यागत्योरुत्क्रांतिरप्यपसृप्तिरेव देहादिति प्रतीयते। न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम्।
देहप्रदेशानां चोत्क्रांतावपादानत्ववचनाच्च चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति। स एतास्तेजोमात्राः सम
भ्याददानो हृदयमेवान्ववक्रामति। शुक्रमादाय पुनरैति स्थानमिति चांतरेपि शरीरे शारीरस्य गत्यागती भवतः। तस्मादप्य राम.
६

स्था १ बुद्धिसत्वस्य ५ ग ४

स्व[stain]स्थ चेतयमाना दृश्यन्ते। अतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेत्येवं प्राप्तेऽभिधीयते। ज्ञो नित्यचैतन्योऽयमात्मात एव य
स्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते। परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं विज्ञानमान
न्दं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिषु श्रुतिषु तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्य
स्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते। विज्ञानमयप्रक्रियायां च श्रुतयो भवन्ति। असुप्त[stain]ः सुप्तानभिचाकशीति अत्रायं पुरुषः स्व
यंज्योतिर्भवति नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत एवंरूपाः। अथ यो वेदेदं जिघ्राणीति स आत्मेति च सर्वैः करणद्वारैरिदं वे
६ देदेति विज्ञानेनानुसंधानात्तद्रूपत्वसिद्धिः। नित्यचैतन्यस्वरूपत्वे घ्राणाद्यानर्थक्यमिति चेत् न गन्धादिविषयविशेषपरिच्छे
दार्थत्वात्। तथा हि दर्शयति गन्धाय घ्राणमित्यादि। यत्तु सुप्ता[stain]दयो न चेतयन्त इति तस्य श्रुत्यैव परिहारोऽभिहितः सुषु[stain]प्तस्य यद्वै नं
तन्न पश्यति [stain] पश्यन्वै तन्[stain]न पश्यति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु त[stain]द्द्वितीयमस्ति ततोऽन्यद्विभ
क्तं यत्पश्येदित्यादिना। एतदुक्तं भवति विषयाभावादियमचेतयमानता न चैतन्याभावादिति। यथा वियदाश्रयस्य प्रकाशस्य प्रका
श्याभावादनभिव्यक्तिर्न स्वरूपाभावात्तद्वत् वैशेषिकादिकल्पनाऽश्रुतिविरोधादाभासीभवति। तस्मान्नित्यचैतन्यस्वरूप एवात्मेति नि
श्चिनुमः॥१५॥ उत्क्रान्तिगत्यागतीनाम्॥ इदानीं तु किंपरिमाणो जीव इति चिन्त्यते किमणुपरिमाण उत मध्यमपरिमाण आहोस्विन्महत्परि

ना ५ त २

आत्मम य २

मी. पीसर्वभूतांतरात्मेतिश्रुतेः बुद्ध्याद्युपाधिभिर्भिन्नत्वस्य प्रविभागवतिभानेप्याकाशस्येव घटादिसंबंधनिमित्ते। तथावस्थातुंसर्वाश्रय
५९ मात्मानं ब्रह्मविज्ञानमयो मनोमयः स्वच्छत्वं मकश्रोत्रमयइत्येवमादिब्रह्मरूपएवाविहितस्य सतोस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति।
तन्मयत्वं वास्य विविक्तस्वरूपानभिव्यक्त्यातदुपरक्तस्वरूपत्वेन्नीमयोजात्मेत्यादिवत्स्वरूपं। यदपि विश्वायात्माविज्ञानमय एव तोतद
प्यतएवौपाधिकसंबंधात्तेनत्वं। उपाध्यभेसन्नावस्थानात्तीत्तत्वलये चप्रलयइति। तथावदर्शयति एतेभ्यो भूतेभ्यः समु
त्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति नवोपाधिपलपरूवा यैनात्मविलयइत्येतदप्यत्रैव मा भगवानमोहांतमापीपदन्नवा
६ इमं विज्ञानामिनप्रेत्यसंज्ञास्तीति प्रश्रुत्वंकंपतिपारयति। नवाअरेहंमोहंब्रवीम्यविनाशीवाअरेयमात्मानुच्छित्तिधर्मा
मात्रासंसर्गस्त्वस्य भवतीति प्रतिज्ञानुपरोधाय विलक्षणस्यैवब्रह्मणो जीवभावाभ्युपगमात्ताल्लक्षण्यमेवो प्पनपोह्यपाधिनिमि
त्तएव। अन्यत्रऊर्ध्वं विमोक्षात्प्रेत्य बुद्धिनिश्चय तस्यैवविज्ञानमयस्यात्मनः सर्वसंसारधर्मप्र[illegible]त्यानेन परमात्मभावप्रतिपादनात् त त्या
मात्रैवात्मोत्पद्यते मलोत्पद्यते वेति।। ताः तत एव ।। सकिंजात्वाद्युतानानामिव आगंतुकचैतन्यः स्वतश्चेतनश्चा[illegible]इत्वित्सांख्यानामिव नित्यचै
तन्यस्वरूपएवेतिवादविप्रतिपत्तेः संशये किं तावत्प्राप्तमागंतुकमात्मनश्चैतन्यमात्ममनःसंयोगजं [illegible] इष्टसंयोगजत्वेनोत्पद्यते राम·
नादिगुणावदित्यापाते। नित्यचैतन्यत्वेहि सुप्तमूर्छितग्रहाविष्टानामपिचैतन्यस्यात्। तेष्वपि नकिंचिद्विद्यम चेतयामहीति जल्पंति। ५९

पं २ म २

इत्यादिवाक्यसंदर्भैनः ४

सेः क्षुद्रा विस्फुलिङ्गा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणा इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्व एव आत्मानो व्युच्चरंतीति भोक्तॄ
णामात्मनां पृथक्सृष्टिं शास्ति यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चै
वापियंतीति च जीवात्मनामुत्पत्तिप्रलयावुच्येते। सरूपवचनाज्जीवात्मानो हि परमात्मना सरूपा भवंति चैतन्ययोगात् न च क्वचिदश्रव
मन्यत्र श्रुतं वारयितुमर्हति। श्रुत्यंतरगतस्याप्यविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्त्तव्यत्वात्। तथा प्रवेशश्रुतिरप्येवं सति विकारभावाप
त्त्यैव व्याख्यातव्या। तदात्मानं स्वयमकुरुतेत्यादिवत्। तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः। नात्मा जीव उत्पद्यत इति। कस्मादश्रुतेः। न ह्य
स्योत्पत्तिप्रकरणे श्रवणमस्ति भूयस्सु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं। सत्यमुक्तं। उत्पत्तिरेव त्वस्य न संभवतीति
वदामः। कस्मान्नित्यत्वाच्च ताभ्यः चशब्दादजत्वादिभ्यश्च। नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते। तथाजत्वमवि[illegible]तस्यैव ब्रह्मणो
जीवात्मनावस्थानं ब्रह्मात्मना चेति। न चैवंरूपस्योत्पत्तिरुपपद्यते। ताः काः श्रुतयः। न जीवो म्रियते स वा एष महानज आत्माजरोऽमरोऽमृ
तोऽभयो ब्रह्म। न जायते म्रियते वा विपश्चित्। अजो नित्यः शाश्वतोऽयं पुराणः। तत्सृष्ट्वा तदेवानुप्राविशत्। अनेन जीवेनात्मनानुप्रविश्य ना
मरूपे व्याकरवाणि। स एष इह प्रविष्ट आ नखाग्रेभ्यः। तत्त्वमसि। अहं ब्रह्मास्मि। अयमात्मा ब्रह्म सर्वानुभूरित्येवमा[illegible] नित्यत्ववादिन्यः श्रुतयो जीवानां नि
त्यत्वं प्रतिपादयंति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तं। अत्रोच्यते नास्य प्रविभागः स्वतोऽस्ति। एको देवः सर्वभूतेषु गूढः सर्वव्या

धौं १ प्र २ धो २ दिवा २

देहाश्रयावुत्पत्तिप्रलयौ जीवस्य न स्त इत्यर्थः प४९

मी-
५८

रोभावयोर्हिंसतोर्जन्ममरणशब्दौ भवतो नात्मनः । न हि शरीरसंबंधादन्यत्र जीवो जातो मृतो वा केन चिदुपलभ्यते । स वा अ
यं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन् म्रियमाणः इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति ।
जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यं । अभावाज्जीवप्रादुर्भावस्य जीवस्य परस्मादात्मन उत्पत्तिर्वियदादीनामिवास्ति ना
स्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति । देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्त इत्येतदनेन सूत्रेणावोचत् ॥१६॥ नात्मा श्रुतेर्नित्यत्वाच्च ता
भ्यः ॥ अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपंजराध्यक्षः कर्मफलसंबंधी स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्य
त इति श्रुतिविप्रतिपत्तेर्विशयः । कासुचिच्छ्रुतिष्वग्निविस्फुलिंगादिनिदर्शनैर्जीवात्मनः परस्माद्ब्रह्मण उत्पत्तिराम्नायते । कासुचि
त्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते । न चोत्पत्तिराम्नायत इति । तत्र प्राप्तं तावदुत्पद्यते जीव इति । कुतः । प्रतिज्ञा
नुपरोधादेव । एकस्मिन्विज्ञाते सर्वमिदं विज्ञातमितीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत । तत्त्वान्तरत्वे तु जीवस्य
प्रतिज्ञोपरुध्येत । न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं । लक्षणभेदात् । अपहतपाप्मत्वादिधर्मको हि परमात्मा त
द्विपरीतो हि जीवो । विभागाच्चास्य विकारत्वसिद्धिः । यावान्ह्याकाशादिः प्रविभक्तः स सर्वो विकारस्तस्य चाकाशादेरुत्पत्तिः समधि राम
गता । जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखयुक् प्रतिशरीरं प्रविभक्त इति तस्य प्रपंचोत्पत्तिकाले उत्पत्तिर्भवितुमर्हति । अपि च यथा ५८

न तयोः क्रमान्तरं मृग्यं सर्वत्रैव भौतिकत्वे लिंगं करणानां अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वागित्येवंजातीय
कः [illegible] व्यपदेशो क्वचित् भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः अथ पुनरभौतिकानि करणानि तथापि न भूतोत्पत्ति
क्रमः करणैर्विशिष्यते प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतान्युत्पद्यन्ते चरमं करणानीति । आथर्वणे तु समाम्नाये पाठक्रमपमा
त्रे करणानां भूतानां च न तदोत्पत्तिक्रम उच्यते तथान्यत्रापि पृथगेव भूतक्रमात्करणक्रम आम्नायते प्रजापतिर्वा इदमग्र आसीत् स आ
त्मानमैक्षत स मनोसृजत तन्मन एवासीत् तदात्मानमैक्षत तद्वाचमसृजत इत्यादिना । तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भंगः ॥ १५ ॥ चराचरव्यपा
श्रयः स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौ
किकाद्व्यपदेशात् जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रान्तिः तामपनुदामः । न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसंबं
धोपपत्तेः । शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां श्रूयते च जीवापेतं वा
व किलेदं म्रियते न जीवो म्रियत इति । ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः । सत्यं दर्शितो भाक्तस्त्वेष जीवस्य जन्ममरण
व्यपदेशः । किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इति उच्यते चराचरव्यपाश्रयः स्थावरजंगमशरीरविषयौ जन्ममरणशब्दौ स्थावर
जंगमानि हि भूतानि जायन्ते च म्रियन्ते च अतस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्येते । तद्भावभावित्वात् शरीरप्रादुर्भावति

शरीरांतरावच्छेदेन [illegible]नेत्यर्थः ४४

दू॰

मी. ५७ कार्या तीति॥ अनन्तस्योपपद्यत इत्यत आह विपर्ययेति॥ ज्ञानानां सतां हि लिङ्गिकालस्य व्यतिक्रान्तावदेवीपीयात॥ आपस्तेजसो जाताः सम्मस्तेजो वायुः एवं
क्रमेण लयस्तस्मिन्संस्तमेतरेचानेनतरम नेनतरं कारणमपीत्यस्य सर्वकार्यत्वात् परमकारणं परमसूक्ष्मं ब्रह्माप्येतीति वेदितव्यं॥ नहि स्वका
रणाव्यतिक्रमेण कारणकारणैरपायो न्याय्यः। स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र प्रदर्शितः। जगत्प्रतिष्ठा देवर्षयः पृथ्वी
अप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयत इत्येवमादौ॥ उत्पत्तिक्रमस्तूत्पत्तावेवक्रान्तत्वान्नाप्ययेमवितुमर्हति॥ नचा
सावयोग्यत्वादप्ययेनाकांक्ष्यते। नहि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः। कारणाप्यये कार्यस्यावस्थानानुपपत्तेः॥ कार्या
प्ययेतु कारणस्यावस्थाने युक्तं मृदादिष्वेवं दृष्टत्वात्॥ अन्तराविज्ञानमनसी क्रमेणतल्लिङ्गादितिचेन्नाविशेषात्॥ भूतानामु त
त्तिप्रलयावनुलोमक्रमाभ्यांभवतइत्युक्तम्। आत्मादिरुत्पत्तिः प्रलयश्चात्मान्त इत्युक्तम्। संहितस्यतु मनसो बुद्धेश्च सद्भावः प्रसिद्धः
त श्रुतिस्मृत्योः बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेवच इंद्रियाणि हयानाहुरित्यादिलिङ्गेभ्यः। तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्ति
प्रलयावुपसंग्राह्यौ॥ सर्वस्यवस्तुजातस्योत्पत्तिब्रह्मत्वाभ्युपगमात्॥ अपिचाथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराखेकरणा
न्युक्रम्यन्ते। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति। तस्मात् पूर्वोक्तोत्पत्तिप्रलयक्र
मभंगप्रसंगो भूतानामिति चेन्नाविशेषात्। यावद्धि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति राम. ५७

प्रतिलोम ५

शाखै १

नोभिध्यायंस्तं तं विकारं सृजतीति संदेहे सति प्राप्तं तावत्स्वयमेव स्वविकारान्सृजंतीति कुतः । आकाशाद्वायुः वायोरग्निरित्यादिस्वात
त्र्यश्रवणात् ननु चेतनानां स्वतंत्राणां प्रवृत्तिः प्रतिषिद्धा । नैष दोषः तत्तेज ऐक्षत ता आप ऐक्षंतेति च भूतानामपि चेतनत्वश्रवणाद
त्येवं प्राप्ते ऽभिधीयते । स एव परमेश्वरस्तेन तेनात्मनावतिष्ठमानोभिध्यायंस्तं तं विकारं सृजतीति । कुतः शास्त्रं यः पृथिव्यां तिष्ठन्पृथि
व्या अंतरो यमयतीत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति तथा सोकामयत बहु स्यां प्रजायेयेति प्रस्तुत्य स सच्च त्यच्चाभवत्
दात्मानं स्वयमकुरुतेति चेतनस्यैव सर्वात्मभावं दर्शयति । यत्तु ईक्षणश्रवणमप्तेजसोः तत्परमेश्वरावेशवशादेव द्रष्टव्यं । ना
न्योतोस्ति द्रष्टेति । किंतु नरखाति चेतनाः ब्रह्मतत्वाख्यसत्तदैक्षत बहु स्यां प्रजायेयेति सूत्र ३ ॥१३॥ विपर्ययेण तु क्रमोत उप
पद्यते च ॥ भूतानामुत्पत्तिक्रमश्चिंतितः येदानीमप्ययक्रमश्चिंत्यते । किमनियतेन क्रमेणाप्ययः उतोत्पत्तिक्रमेणाथवात
द्विपरीतेनेति । त्रयोपि चोत्पत्तिस्थितिप्रलयाः भूतानां ब्रह्माधीनाः श्रूयंते यतो वा इमानि भूतानि जायंते । येन जातानि जीवंति
यत्प्रयंत्यभिसंविशंतीति । तत्रानियमोऽविशेषादिति [illegible] अथवोत्पत्तिक्रमस्यावगतत्वात्प्रलयस्यापि क्रमाकांक्षिणः स एव क्रम
स्यादित्येवं प्राप्ते । ततो ब्रूमो विपर्ययेण तु प्रलयक्रमोतः उत्पत्तिक्रमाद्भवितुमर्हति तथाहि लोके दृश्यते येन क्रमेण सोपानमारूढ
स्ततो विपरीतेन क्रमेणावरोहतीति । अपि च दृश्यते मृदो जातं घटशरावाद्यप्ययकाले मृद्भावमप्येति अद्भ्यश्च जातं हिमकरकाद्यब्भावमप्ये

पं॰

मी॰ श्यादिनाऽच्यते। किं वा पृथिवीति। तत्र पृ(?) त्वावत्। श्री(?)स्विय वा घोऽदना। दिवा परिगृहीतत्वमिति। तत्र सूत्रे शब्दः प्रसिद्धेर्नो द्रव्या(?)नास्य
५६ शेषोऽयं तमर्थमनुपोद्बलयति। तस्माद्यत्र कांचनवर्षं तत्र देवभूयिष्ठमत्रे भवती ति। श्रीस्विय वा येव स्विस्ति निर्वर्तेत बहुः ... तिन पृथिवी
त्वं वंशानुक्रमः। पृथिव्येवेयमत्रशब्देनाऽभ्योऽनायमाना विवक्षितेति। कस्मादत्र विकारात ता रूपा ना शब्दो तत्र ख्या। प्रसिद्धा रस्या ...
तैजोत्स्वननतत्र दपोऽस्वजते ... व महाभूतविषयावर्ज्येति। तत्र क्रमप्राप्तं पृथिवी महाभूते विनेश्यना। कस्माद्धीत्या(?)दिपरिग्रहो न्या(?)यः। तयाऽऽत्
पमविवाक्यशेषे पृथिव्यनुगुणेऽस्यते। पत्तूलं तत्रत्रस्ये तिान स्योऽदनादेरम्य वस्तार्थस्य हुतत्वनियमोऽस्ति। नाविव्रीह्यादीनामनु पृथिव्याः श्रु
विनेवहुलत्वनियमोऽस्ति। यथा पाण्डुरस्याङ्कुरस्याहितस्य वन्दे त्रसादर्शनात्। नायं दोषो बाहुल्यादेनत्वात्। भूयिष्ठे हि पृथिव्याः कृत
रूपं न तथाऽप्तरोहितेऽपोरालोकाः। अपि पृथिव्याः कार्यासार्वत्र मुख्य ... स्वाव हन्तामालेस्यतः ... कं रूपं पृथिव्याः इति निश्चीयते। कृष्णतरमपि
६ समानाधिकारमध्यः पृथिवी निमवतीति। तथ दृष्टोदारश्चाभीतत्समरूप्यतत्ताः पृथिव्यामवदिनिचा पृथिव्यालक्षीत्याप स्पष्टं निर्दर्शयति। पृ
थिव्याः ऊषघयऊषधीभ्योऽन्नमिति चैवमपि विकारादिपृथिव्याः प्रतिपादके श्रुतस्तुकृतो व्रीह्यादि श्रुतिपक्षेः प्रसिद्धिरधिकारादिति
रेव लाभ्यते। वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तत्कारेता पृथिव्या एवाम्बुः प्रमेवक्तत्वपतीति दृश्यते। तस्मात्पृथिवीयमन्नशब्देनेति। तत्र राम॰
निधानादेवतुनर्लिङ्गात्स्वः। ... मानि विपदादीनि भूतानि तद्वयमेवस्वविकारात् ... स्यास्तोऽस्मिन्परमेश्वरस्तेनेते नान्यनादनिश्चया ५६

क्र   न१
स्र२

काशः संभूत इति श्रुतस्तात्संभवस्य पदादानस्यात्मनः पंचमीनिर्देशात्तस्यैव च संभवत्तेरिहापि कारात्परत्ता दर्शितः दधिक्षीरे इति
ष्या ॐ वपथयस्यपादाने पंचमी दर्शनात् क्षयोरग्निरित्यप्यपादाने पंचम्यैवेति गम्यते। अपि च वायोरूर्ध्वमग्निः संभूत इति कल्पेऽप
पदार्थयोगः स्फुमत्तकारकार्थयोगो वायोरग्निः संभूत इति तस्मादेषा श्रुतिः वायुयोनित्वं तेजसो गमयतीति न चेतरापेक्ष्या किं तु स
योनित्वे तेजसो गमयतीति तेनेजो ब्रह्मजमिति नियन्तस्याः पारंपर्यजत्वेप्यविरोधात्। यदा पयस्याकाशं वायुं वसद्भावायुभावापन्नं ब्रह्म तेजो स
त्प जतेति ब्रह्मजत्वेपि तेजसो न विरुध्यते। यथा तस्याः शृतेन तस्या दधि तस्या आमिक्षेत्यादी दर्शयति च ब्रह्मणो विकारात्मना वस्था
नेन दात्मानं स्वयमकुरुतेति। तथा वेश्वरस्मरणं भवति बुद्धिर्ज्ञानमसंमोहः इत्याद्युक्त्वा भवंति भावा भूतानां मत्त एव पृथग्विधा इति य घ
पि बुध्यादयः स्वकारणेभ्यः प्रत्यक्षं भवंतो ईश्वरं नेन यापि सर्वस्य भावजातस्य सा ज्ञात्मना भावेश्वरवेद्यत्वात्। एतेनाक्रमस्य सृष्टिवादिन्य
क्रतयो व्याख्याताः। तासां सर्वासामुपपन्नेः। क्रमवत्सृष्टिवादिनीनां त्वेष यापानुपपन्नेः प्रति तापितहं रूपत्वमात्रमपेक्षतेनाव्यपद्धितन
मात्वमिति स्पाविरोधः॥ ११॥ ॐ अतस्माप्याहास्त्वरूवर्ज्ञते। आपोत्स्नेस्तसेज्जो यते। तस्मात्तद्याप्याहा। तदपोसृजततेतिचाग्नेरापइतिव
सति वचनेनास्ति सेशयः। तेजसस्तत्सृष्टिं व्याख्याय इदानीमपां सृष्टिं व्याचष्टे। पात्रीं प्याभिस्यापइति सत्र यांव भव॥ इयं स्वविकाररूपशब्दं
तेरूपः। तापापरे ह्नंतव...स्यांसडनायेमभीतितात्यग्नस्वल्पजं ततिति श्रुत्ये। तत्रसंशयः। किमनेनान्वेशदेन्धाशियवा घम्पकरूपर्थवा

[illegible]

मी. ५५ ननु वियदसत्त्वमसंभववदपि वितिरेकेन खलु ब्रह्मणः सदात्मकस्य कुतश्चिदन्यतः संभवत्युत्पत्तिराशंकितव्या। कस्मादनुपपत्तेः। सन्मात्रं हि ब्रह्म
न तस्य सन्मात्रादेवोत्पत्तिः संभवति असत्यतिशये प्रकृतिविकारभावानुपपत्तेः। नापि सद्विशेषात् दृष्टविपर्ययात्। सामान्याद्धि विशेषा उत्प
द्यमाना दृश्यंते न तु विशेषेभ्यः सामान्यं। नाप्यसतः निरात्मकत्वात्। कथमसतः सज्जायेतेति चाक्षेपश्रवणात्। स कारणं क
२८ साम्य २ यामनपेक्षस्वरूपाणां स्वरूपप्रणाशभयात्परस्परं प्रत्यंगांगिभावानुपपत्तेर्बाह्यस्य च कस्यचित्क्षोभयितुरभावाद्गुण
वैषम्यनिमित्तो महदाद्युत्पादो न स्यात् ॥ ॥अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ॥अथापि स्यादन्यथा वयमनुमिमी सापेक्षत्वेन २
महे यथा नायमनन्तरो दोषः प्रसज्येत न ह्यनपेक्षस्वभावाः कूटस्थाश्चास्माभिर्गुणा अभ्युपगम्यन्ते प्रमाणाभावात् कार्यवशे
न तु गुणानां स्वभावोऽभ्युपगम्यते यथा यथा कार्योत्पाद उपपद्यते तथा तथैषां स्वभावोऽभ्युपगम्यते चलं गुणवृत्तमिति
चास्त्यभ्युपगमस्तस्मात्साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्ते एवमपि प्रधानस्य ज्ञशक्तिवियो तानवस्थि:
गाद्रचनानुपपत्त्यादयः पूर्वोक्ता दोषास्तदवस्था एव ज्ञशक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्त्तेत चेतनमेकमने
कप्रपंचस्य जगत उपादानमिति ब्रह्मवादप्रसंगात् वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावा
न्नैव वैषम्यं भजेरन् भजमाना वा निमित्ताभावाविशेषात्सर्वदैव वैषम्यं भजेरन्निति प्रसज्यत एवायमनन्तरो दोषः सर्वत्रैव सर्वदा
विप्रतिषेधाच्चासमंजसं ॥ परस्परविरुद्धश्चायं सांख्यानामभ्युपगमः क्वचित्सप्तेन्द्रियाण्यनुक्रामंति क्वचिदेकादश राम.
तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशंति क्वचिदहंकारात्तथा क्वचित्त्रीण्यन्तःकरणानि वर्णयंति क्वचिदेकमिति प्रसिद्ध २८

अंगीकार्यत्वं ज्ञानशक्तेर्वैषम्येति ४

न प्राणानेक ज्ञानेंद्रियं च कर्मनेक ... ज्ञानकारणं पंच कर्मेन्द्रियाणि ... ज्ञानेन्द्रियाणि पंच कर्मेन्द्रियाणि पंच मनश्चेत्येकादश बुद्धिरहंकारो मन इति त्रीणि एकमिति बुद्धिरेव
कार्यार्थिज्ञानशक्तिकल्पनेऽनेकप्रसंगः स्यादित्यर्थः ४

अस्ति पुरुषस्य दृक्शक्तिश्चिद्रूपत्वात् अस्ति च प्रधानस्य सर्गशक्तिः त्रिगुणत्वात् तयोः शक्त्योर्वैयर्थ्यं स्याद् विना सार्थक्याभोगा प्रधानस्य प्रवृत्तिरिति चेन्न शक्त्योर्नित्यतया सृष्टिनित्यता
पत्तिरित्याह दृक्शक्तीति १   ७ पुरुषस्य परिस्पंदः प्रयत्नगुणो वा नास्तीत्येतत्कुत इत्यत आह प्रधानपुरुषयोर्नित्यत्वात् व्यापित्वाच्च नित्यः संनिधिः अतः सन्निधिमात्रेण प्रवर्तनं सततं तेन स्थायायमानित्वं संनि
धिरिति व्यापारो नास्ति लोहस्य स्वसंबंधोपि तत्र भासते इत्यर्थः ७

दृक्शक्तिविषयः १   बी॰ ४   केन त्वस्य

स्यर्था प्रवृत्तिर्नहि प्रधानस्याचेतनस्यौत्सुक्यं संभवति । न च पुरुषस्य निर्मलस्य । दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिस्तर्हि
दृक्शक्त्यनुच्छेदवत्सर्गशक्त्यनुच्छेदात्संसारानुच्छेदादनिर्मोक्षप्रसंग एव । तस्मात्प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तं ॥
नैवदोषात्प्रमुक्तिरितिशेषः २ पुरुषाश्मवदिति चेत्तथापि ॥ स्यादेतद्यथा कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिशक्तिविहीनः पंगुरपरं पुरुषं प्रवृत्तिशक्तिसंपन्नं
दृक्शक्तिविहीनमंधमधिष्ठाय प्रवर्त्तयति । यथा वायस्कांतोश्मा स्वयमप्रवर्त्तमानोप्ययः प्रवर्त्तयत्येवं पुरुषः प्रधानं प्रवर्त्त
यिष्यतीति दृष्टांतप्रत्ययेन पुनः प्रत्यवस्थानमत्रोच्यते । तथापि नैव दोषान्निर्मोक्षोस्त्यभ्युपेतहानं तावद्दोष आपतति
प्रधानस्य स्वतंत्रस्य प्रवृत्त्यभ्युपगमात्पुरुषस्य च प्रवर्त्तकत्वानभ्युपगमात्कथं चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत्पंगुरपि हि
अंधं वागादिभिः प्रवर्त्तयति । नैवं पुरुषस्य कश्चित्प्रवर्त्तकव्यापारोस्ति निःक्रियत्वान्निर्गुणत्वाच्च । नाप्ययस्कांतवत्सन्निधिमात्रे
ण प्रवर्त्तयेत्सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसंगादयस्कांतस्य त्वनित्यस्य सन्निधेरस्ति स्वव्यापारः संनिधिः परिमार्जनाद्यपेक्षा
चास्यास्तीत्यनुपन्यासः पुरुषाश्मवदिति तथा प्रधानस्याचैतन्यात्पुरुषस्य चौदासीन्यात्तृतीयस्य च तयोः संबंधयितुरभावात्संबंधा
नुपपत्तिर्योग्यतानिमित्ते संबंधे योग्यतानुच्छेदादनिर्मोक्षप्रसंगः पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः । परमात्मनस्तु स्व
रूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयं च प्रवर्त्तकत्वमित्यस्त्यतिशयः ॥ अंगित्वानुपपत्तेश्च ॥ इतश्च न प्रधानस्य प्रवृत्तिरवक

२ नन्विच्छिन्नयोर्दृग्दृश्यभावयोग्यता नित्यतया तत्कालः संबंधः स तत्राह योग्यतेति । विच्छिन्ने तत्स्वभावा योग्यता नित्यत्वात् संबंधनित्यत्वापत्तिरित्यर्थः । यथा स्वतंत्रप्रधानप्रवृत्तिपक्षे भोगापव
र्गाभ्यां वा फलमिति विकल्प्य दूषितं तथैव पुरुषाधीनप्रधानप्रवृत्तिपक्षेपि विकल्प्याभावेन दूषणीयमित्याह पूर्ववदिति । दृष्टांतेषु उदासीनस्य कथं प्रवर्त्तकत्वमित्याशंक्याह परमात्मन इति । स्वा
रूपमतोपि संविरुद्धं सत्त्वात् अस्मन्मते कल्पितात्कल्पितं न वास्तविरोध इत्यर्थः १

उभयार्थताम्भ्युपगमिष्यतीति। न तावदपवर्गः साध्यः तस्य प्रधानाप्रवृत्तिमात्रेण सिद्धत्वात्। भोगार्थं तु प्रवर्त्तते भोगस्य च शब्दाद्युपलब्धिमात्रादेव समाप्तत्वात्तदर्थं प्रधा
नं प्रवर्त्तते। एवमपि मोक्षः स्यात्। अनिःशेषशब्दाद्युपभोगस्य त्वानन्त्येन समाप्तेरनुपपत्तेरनिर्मोक्षप्रसंगः। कृतभोगमपि प्रधानं आसन्नत्वपुरुषान्यताख्यात्यै। किमर्थमभि
सरेण भोजयतीति चेत् अथ पुरुषार्थाय प्रवृत्तं किमर्थं स्वं पुरुषान्यताख्यातिं करोतीति। अ [illegible] नष्टं [illegible] हृतं भोगं सत्त्वशब्दाद्युपभोगेन कृतत्रयोऽलं

१२ श्री २७

[illegible] पुन क्षीरस्य चाभावात् धेन्वाद्युपभुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुदाद्युपभुक्तं वा। यदि हि निर्निमित्तमेत
त्स्याद्धेनुशरीरसंबंधादन्यत्रापि तृणादि क्षीरीभवेन्न च यथाकामं मानुषैर्न शक्यं संपादयितुमित्येतावता निर्निमित्तमेव भवति भवति
हि किंचित्कार्यं मानुषसंपाद्यं किंचिद्दैवसंपाद्यं मनुष्या अपि शक्नुवंत्येवोचितेनोपायेन तृणमाहृत्य धेनवे प्रदाय क्षीरं संपादयितुं प्र
भूतं तु क्षीरं कामयमानाः प्रभूतं घासं धेनुं चारयंति ततश्च प्रभूतं क्षीरं लभंते तस्मान्न तृणादिवत्स्वाभाविकः प्रधानस्य
परिणामः॥ अभ्युपगमेऽप्यर्थाभावात्॥ स्वाभाविकी प्रधानस्य प्रवृत्तिर्न भवतीति स्थापितं। अथापि नाम भवतः श्र
द्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव कुतः॥ अर्थाभावात् यदि तावत्स्वाभा
विकी प्रधानस्य प्रवृत्तिर्न किंचिदन्यदपेक्षत इत्युच्यते ततो यथैव सहकारि किंचिन्नापेक्षते एवं प्रयोजनमपि किंचिन्नापे
क्षिष्यत इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्त्तत इतीयं प्रतिज्ञा हीयेत स यदि ब्रूयात्सहकार्येव केवलं नापेक्षते न प्र
योजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगो वा स्यादपवर्गो वोभयं वेति भोगश्चेत् कीदृशोऽनाधेयातिश
यस्य पुरुषस्य भोगो भवेदनिर्मोक्षप्रसंगश्च॥ अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात्प्रवृत्तिरनर्थिका स्यात्। राम। २
शब्दाद्यनुपलब्धिप्रसंगश्च॥ उभयार्थताभ्युपगमेऽपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसंग एव न चौत्सुक्यनिवृ २

मीमांसाभ्युदयेतिदतिमन्माभोग्या: १

प्रधानस्य न स्वतः प्रवृत्तिः स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्यापेक्षाभावप्रसंगादि २५
त्यर्थः। तत्रेत्यापत्तिं निरस्यति इत्यत: प्रधानमिति। उक्तप्रसंगस्येष्टत्वे आ [illegible] हानिः स्यादित्यर्थः। अर्थसंभवान्न स्वतः प्रवृत्तिरित्यर्थांतरं शंकापूर्वकमाह समीहितादिना।
प्रयोजनमनपेक्षितं चेदुक्तं एवमित्याह तथापीति। कूटस्थे पुरुषे स्वतः सुखादिरूपस्यातिशयस्याधातुमशक्यत्वात् दृश्यासाक्षिणी [illegible] भोगो न मुक्तः किं च प्रधानप्रवृत्ते भोगार्थ
त्वे [illegible] प्रसंग इत्यर्थः। स्वतः सिद्धेर्निरस्यति उभयार्थतेति।

तदर्थमप्र [illegible]
त्वात्प्रधान
[illegible] मिमा पं १

स्वप्रधानस्य स्वाभाविकं
निर्धन [illegible]
सिध्यती [illegible]
त्वपुरुषान्यता
ख्यातिः [illegible]
न वास्या: [illegible]
पुरुषार्थत्वं तस्मा
उभयार्थ [illegible]
सिद्धोर्था

अस्तु प्रधानस्यापि धर्मादिकर्मपुरुषो वा प्रवर्तक इत्याशंक्य सूत्रं प्रवृत्तं तथा चाहे सांख्यानामिति प्रधानव्यतिरेकेण कर्मणो न वास्थितेः पुरुषस्योदासीनत्वात्तिक
दाचित्सृष्टिप्रवृत्तिः कदाचित्प्रलय इत्यपि युक्तमित्यर्थः कर्मणोपि प्रधानात्मकत्वाच्चेतनत्वात्सदासत्त्वाच्च नकदाचित्कप्रवृत्तिनियामकत्वमिति भावः २

न१ कु१ त२

निवेतन्नो हीरतद्धीत्यत्रो बाध्यनेमिन्नानिरपेक्षमपि स्वाश्रयं कार्यं प्रसवतीत्येतल्लोकदृष्ट्या निदर्शितं शास्त्रेषु ध्या
पुनः सर्वत्रैवाश्रयापेक्षत्वमापद्यमानं न प्रतरतु घटते॥ व्यतिरेकान्नवस्थितेश्चानपेक्षत्वात्॥ सर्वोनोत्र वेद्यत्वाः
साम्ये नाव नित्यमानः प्रधानं नत्तद्व्यतिरेकेणाप्रधानस्य प्रवर्तकं नित्यकर्तृकं वा किं चिं वा व्यमपेक्षमवच्छिन
मस्ति पुरुषस्तूदासीनो न प्रवर्तको नानिवर्तकः स्यतो नपेक्षप्रधानमनपेक्षत्वाच्च कदाचित्प्रधानं महदा
द्याकारेणैमतेकदाचित्र परिणमत इत्येतदयुक्तमीश्वरस्य तु सर्वज्ञत्वात्सर्वशक्तित्वान्महामायत्वाच्च नि
नवस्य पेक्षानविरुद्ध्यते॥॥ अन्यत्राभावाच्च न तरणादिवत्॥ स्यादेतद्यथा तृणापल्लवोदकादि निमित्तानतर दा
निरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते। एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति कु
यं चानिमित्तान्तरनिरपेक्षं तृणादीति गम्यते। निमित्तान्तरात्तु पलंभात्॥ यदि हि क्वचिन्निमित्तमुपलभेमहि स्त
ततो यथा कामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं संपादयेम हि न तु संपादयामहे तस्मात्स्वाभाविक
एवादिपरिणामस्तृणादीनां प्रधानस्यापि स्वाभाविक इति चेद् उच्यते। नैव तृणादीनां प्रधानस्य स्वाभाविकः परिणा
मापेक्षिण्यादेरपि स्वाभाविकपरिणामे स्वपगम्येत न त्वन्यप्रयोगे तेनिमित्तान्तरोपल[?]कथं निमित्तान्तरे रा

म्प१ ध्रे४१

यस्कतएकत्वेऽपि कार्यितं द्वैतं प्रवर्त्तमस्ती स्याहनाविचेति। अविद्यया कल्पितेः ... तस्मद्वयं देहेंद्रियेवा विवर्त्तमानस्वमामायमाम आवेशाश्चिदात्मनिः कल्पितः संबंधस्तस्य बलात् सामर्थ्यं तेनांतर्यामि त्वादिकं
स्वरस्वेकृत्कं ... ना वोधास्सर इत्यर्थः ३

स्कां १ गतः सर्वो २

मी. नुस्वा विप्रवर्त्तनं कृत्वोपपन्नेऽर्थधा पूर्व ... न्नो मति। स्वयं प्रवृत्तिरहितो पि अपस्पवर्त्तने को नुवत्तिर्यथा वत्सपाद्यो वि
२६ पीः स्वयं प्रवृत्तिरहितान्यपि चतुरादीनी प्रवर्त्तकानि मवत्येवं प्रवृत्तिरहितो प्यस्य रः सर्वं न्मा सर्वत्तः सर्वेत्य ... य
सन्नीवेव वर्त्तये दित्युपपन्नं एवं तत्वान्यवर्त्यभावि प्रवर्त्तनं कर्त्तानुपपन्नमिति चेन्नाविद्याशक्त्युपस्थापितत्वान्मरूप
मायावेशावशेनासह ... कृत्वान्नसोत्संभवति प्रवृत्तिः सर्वत्र कारणात्वे। न चेतनेन न कारणात्वे। पयोंबुवच्चे
तनाऽपि स्यादेतत्तद्यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्धये प्रवर्त्तते यथा च जलमचेतनं स्वभावेनैव लोकोप
काराय स्यंदते एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्त्तिष्यत इति। नैतत्साधूच्यते। यतस्तत्रापि
पयोंबुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे। उभयवादिप्रसिद्धेरथादावचेतने केवलेऽप्रवृत्तिद
र्शनात्। शास्त्रं चैवं ... तिष्ठन् ... योंतरो यमयत्येतस्य ... स्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यंदंते इत्येवं
जातीयकं समस्तस्य लोकपरिस्पंदितस्येश्वराधिष्ठिततां श्रावयति तस्मात्साध्यपक्षनिक्षिप्तत्वात्पयोंबुवदित्यनु
पन्यासः। चेतनायाश्च धेनोः स्नेहेच्छया पयसः प्रवर्त्तकत्वोपपत्तेर्वत्सचोषणेन च पयस आकृष्यमाणत्वात्। नांबु
नोप्यत्यंतमनपेक्षा निम्नभूम्याद्यपेक्षत्वात्स्यंदनस्य चेतनापेक्षत्वं तु सर्वत्रोपदर्शितमुपसंहारदर्शनान्नेति २६

... स्वभावाधिष्ठितता प्रतिवक्तुः पूर्वापरविरोधमाशंक्यो ४ लोके इच्छाशास्त्र ... वो ४ ... लोक ... विक्षकोऽपि निक्षिप्त तात् अनुमानमाभ्यामिति विशेषः १
... मात्र उपसंहारेति १

साध्यपक्षनिक्षिप्त त्वात् २

राम.
२६

केवलस्य न दृष्टा । स एव मेतत्त्वेऽपि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टान्तत्वे केवलचेतनसंयुक्तस्याचेतनस्य प्रवृत्तिः ३

एवमचेतनाः सन्तश्चेतनैः कुलालादिभिरध्यासिताः सर्वे न चिदित्ता विशिष्टकार्याभिमुखप्रवृत्तयो दृश्यन्ते दृष्टान्ते
दृष्टसिद्धिरतः प्रधानस्यानुपपन्नेरपि चेतनेनाचेतनजगत्कर्तृत्वमनुमानतः संभवति । ननु चेतनस्यापि चात्रैव दृष्टं किं पुनर
चेतनं प्रवर्त्तयितुं दृष्टान्तस्य सत्त्वे तत्प्रयुक्तस्य दृष्टान्तस्येति । ननु प्रवर्त्तमानो दृश्यते प्रवर्त्तितस्य सति
प्रयुक्तस्य प्रयत्नवत्त्वात्तु प्रवर्त्तमानो प्रयत्नेन केवलश्चेतनो रथादिवत्प्रवर्त्तकस्य प्रदेशे दृष्टं प्रयुक्तस्य
न तु चेतनस्य स्वभावसिद्धिः । चेतनाचेतनरथादिवत्तत्त्वं जीवदेहस्य दृष्टमिति । अत एव चक्षुरादेर्देहे निर्दे
दर्शनात् । दृष्टमिति वा दर्शनान्तरदेहस्य चेतनस्यापि तिलोकात्पत्तिकाः प्रतिपन्नास्तस्मात् चेतनस्य प्रवृत्ति
रितिन्नाभिधीयते । नह्येवं चलितं चेतनेन प्रवर्त्तितं दृष्टचेतनस्येति । भवितुं तस्य वत्सा सो चेतनाऽप्रवर्त्तीति मन्त्र
भावेन वा तन्त्रभावे चात्मा वा घटादिप्रकारादि प्राप्त्यादिविकारस्य कुशादिभिर्न स्वरूपसिद्धिः यावत्प्रलम्बमानादिचेतन
नैज्वलनेज्वलनादेव भवति न संयोगे दर्शनात्तद्वियोगे चादर्शनात् दृष्टा नीता घटितकानामपि चेतन एवं देहो
चेतनानां रथादीनां प्रवर्त्तकोऽस्त्येव विप्रतिपत्तिर्हि चेतनस्य प्रवर्त्तकत्वे । न च तद्देहादिसंयुक्तस्याप्यात्मनो वि
ज्ञानस्वरूपमात्रव्यतिरिक्तस्य प्रवृत्त्यनुपपन्नेरुपपत्तेः प्रवर्त्तकत्वमिति चेत् । आपत्तेर्न वक्तव्याऽदिवत्प्रवर्त्तन्तिराहेति

पी॰
२५

रिच्छनीदृश्यतेन। तदृश्यप्रधानस्यापि चेतनानधिष्ठितत्वप्रसंगः। नरम्मदाद्युपादानस्वरूपव्यपाश्रयेयतौ च दृष्टांता
नित्वेकरत्वामवधारयिष्यते न वा त्यकुलालकारादिव्यपाश्रयेतोति किंचिद्विधामकमस्ति। न वैवं सति नाकिंचिद्विलप्यते॥
प्रसक्तं तदृश्यानिरनुरूपस्य तेकेन नकास्य पर्यालोचितो स्वे नानुवपन्ने स्वहेतो नर्वृत्तं ने जगत्कारतं अनुमानतिये
न तत्स्वरूपं घनुपपत्तेश्चित्ते चक्षा वृत्तस मुखितो तिनहि बाह्या ध्यात्मिकानां भेदानां सुखदुःखमोहात्मतयान्वयेऽ
नुपपद्यते। सुखादीनामात्मस्वरूपप्रतीतेः शब्दादीनां चान तद्रूपत्वप्रतीतेः तन्निमित्तत्वप्रतीतेस्त्र। शब्दाद्यविशेषेपि च भी
वनीविशेषात्सुखादिविशेषोपलब्धेः। तथापरिमितानामपि दानां मूलानां कुरादीनां संसर्गपूर्वकत्वं दृष्टं बाह्याध्या
त्मिकानां भेदानां परिमितत्वात्संसर्गपूर्वकत्वमनुमिमानस्य सत्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसंगः
परिमितत्वाविशेषात्कार्यकारणभावस्तु प्रेक्षापूर्वनिर्मितानां शयनासनादीनां दृष्टइति न कार्यकारण
भावाद्बाह्याध्यात्मिकानां भेदानामचेतनपूर्वकत्वं शक्यं कल्पयितुं॥ प्रवृत्तेश्च॥ आस्तां तावदियं रचनानुपप
त्तिः तत्सिद्ध्यर्थं यात्रवस्थानात्साम्यावस्थानाच्च्युतिः सत्वरजस्तमसामंगांगिभावरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिता सापि ना
चेतनस्य प्रधानस्य स्वतंत्रस्योपपद्यते। मृदादिष्वदर्शनाद्रथादिषु चेतन (?) स्येयतात्वं वा स्यात्स्यो गा त
२५

सर्वे… [illegible] …कार्या निरस्ताः इत्यतोऽत्र … [illegible] … इत्यर्थः २ अर्थजिज्ञासया … तदर्थस्वभावत एव प्रवर्तंते

६ स्वतंत्र … [illegible] … इत्यर्थः ६

नैनद्यारव्या१

म्प१

स्वपक्षस्थापनाय वेदांतवाक्यान्युदाहृत्य स्वपक्षानुगुण्येनैव योजयंतो व्याचक्षते तेषां यद्व्याख्यानं व्याख्यानाभासं न सम्यग्व्या

ख्यानमित्येतावत्पूर्वं कृतं इदानीं तु वाक्यनिरपेक्षः स्वतंत्रस्तद्युक्तिप्रतिषेधः क्रियत इत्येष विशेषः तत्र सांख्या मन्यंते

यथा घटशरावादयो भेदा मृदात्मतयान्वीयमाना मृदात्मकसामान्यपूर्वका लोके दृष्टास्तथा सर्व एव बाह्याध्यात्मि

का भेदाः सुखदुःखमोहात्मतयान्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हंति यत्तत्सुखदुःख

मोहात्मकं सामान्यं तत्त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य पुरुषस्यार्थं साधयितुं स्वभावेनैव विचित्रेण विकारात्मना वि

विवर्तत इति तथा परिमाणादिभिरपि लिंगैस्तदेव प्रधानमनुमिमते तत्र वदामः यदि दृष्टांतबलेनैवैतन्निरूप्येत ना

चेतनं लोके चेतनानधिष्ठितं स्वतंत्रं किंचिद्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान्विकारान्विरचयद्दृष्टं गेहप्रासा द

शयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यंते तथे

दं जगदखिलं पृथिव्यादि नानाकर्मफलोपभोगयोग्यं बाह्यमाध्यात्मिकं च शरीरादि नानाजात्यन्वितं प्रतिनियता असाधारणः

वयवविन्यासमनेककर्मफलानुभवाधिष्ठानं दृश्यमानं प्रज्ञावद्भिः संभावितमैः शिल्पिभिर्मनसाप्यालोचयि

तुमशक्यं सत्कथमचेतनं प्रधानं रचयेत् लोष्टपाषाणादिष्वदृष्टत्वान्मृदादिष्वपि कुंभकाराद्यधिष्ठितेषु विशिष्टाका

लोके४ श्लो१ बाह्यं पृथिव्यादि … आध्यात्मिकं शरीरादि … भोगायतनं २१३

Left margin notes: भिर्यंतत्र … दारा: / भेदानामि … कार … जी… / … [illegible]

महामायमायावत्… [illegible] …सिद्धं २

…निर्णयस्य… [illegible] …६

सर्वज्ञं २

मी. २८

परूपरिग्रहपक्षानंप्रकरणामुपसंहरति। यस्मादस्मिन्ब्रह्मणिकारणेपरिगृह्यमाणेप्रदर्शितेनप्रकारेणसर्वेकारण
धर्मा उपपद्यंतेसर्वज्ञंसर्वशक्तिमहामायंचब्रह्मेतितस्मादनतिशंकनीयमिदमौपनिषदंदर्शनमिति॥ ०॥ इतिश्रीशारीर
कमीमांसाभाष्येश्रीशंकरभगवत्पादकृतौद्वितीयाध्यायस्यप्रथमःपादः॥ ॥ रचनानुपपत्तेश्चनानुमानं॥ ॥
यद्यपीदंवेदांतवाक्यानामैदंपर्यंनिरूपयितुंप्रवृत्तंशास्त्रंनतर्कशास्त्रवत्केवलाभिर्युक्तिभिःकंचित्सिद्धांतंसाधयितुं
दूषयितुंवाप्रवृत्तंतथापिवेदांतवाक्यानिव्याचक्षाणैः सम्यग्दर्शनप्रतिपक्षभूतानिसांख्यादिदर्शनानिनिराकरणी
ता यानीतितदर्थः परःपादःप्रवर्त्तते। वेदांतार्थनिर्णयस्यचसम्यग्दर्शनार्थत्वात्तन्निर्णयेनस्वपक्षस्थापनंप्रथमंकृतंतद्ध्यभ्यर्हि
तंपरपक्षप्रत्याख्यानादिति। ननुमुमुक्षूणांमोक्षसाधनत्वेनसम्यग्दर्शननिरूपणायस्वपक्षस्थापनमेवकेवलंकर्तुंयु
क्तंकिंपरपक्षनिराकरणेनपरविद्वेषकरेण। बाढमेवंतथापिमहाजनपरिगृहीतानिमहांतिसांख्यादितंत्राणिसम्य
यानीत्येन ३ ग्दर्शनापदेशेनप्रवृत्तान्युपलभ्यभवेत्केषांचिन्मंदमतीनामेतान्यपिसम्यग्दर्शनायोपादेयानीत्यपेक्षा। तथायुक्तिगाढ
त्वसंभवेनसर्वज्ञभाषितत्वाच्चश्रद्धाचतेष्वित्यतस्तदसारतोपपादनायप्रयत्यते। नन्वीक्षतेर्नाशब्दंकामाच्चनानुमा
नापेक्षाइत्येतेनसर्वव्याख्यानाद्इतिचएवंत्र्यापिसांख्यादिपक्षप्रतिषेधःकृतःकिंपुनःकृतकरणेनेति। तदुच्यते। सांख्याद राम २८

…प्रधानस्य… [illegible] …इति मंतव्यं २

अध्याय २

[illegible]

कर्मव्यतिरेकेण ३ [illegible] संसारस्यानादित्वं [illegible]

मुक्तेर्मुक्तानामपि पुनः संसारोद्भूतिप्रसंगः कृताभ्यागमप्रसंगश्च । सुखदुःखादिवैषम्यस्य निर्निमित्तत्वान्न चेश्वरो वैषम्य
हेतुरित्युक्तं न त्वविद्या केवला वैषम्यकारणमेकरूपत्वात् रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकृत्स्यात्
न च कर्मान्तरेण शरीरं संभवति न च शरीरमन्तरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसंगोऽनादित्वे तु बीजाङ्कुरन्यायेनो
पपत्तेर्न कश्चिद्दोषो भवत्युपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः । श्रुतौ तावदनेन जीवेनात्मनेति सर्गप्रमुखे शरीर
नात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति । आदिमत्त्वे तु प्रागनवधारितप्राणः सन्
कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत । न च धारयिष्यतीत्यतोऽभिलप्येत अनागताद्धि संबंधादतीतः
संबंधो बलवान्भवत्यभिनिष्पन्नत्वात् । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति च मंत्रवर्णः पूर्वकल्पसद्भावं द
र्शयति । स्मृतावप्यनादित्वं संसारस्योपलभ्यते न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा । अश्वत्थमेनं सुविरू
ढमूलमसंगशस्त्रेण दृढेन छित्वा ॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः इति । पुराणे चातीतानामनागतानां
च कल्पानां न परिमाणमस्तीति स्थापितं ॥ सर्वधर्मोपपत्तेश्च ॥ चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदा
र्थे परैरुपक्षिप्तान्विलक्षणत्वादीन्दोषान्पर्यहार्षीदाचार्यः इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणं प्रारिप्समानः स्व

ति ४

[illegible]

हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि का
मी. रणानि भवन्त्येवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्मा
२३ णि कारणानि भवन्त्येवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्यमोत्तमं सं
सारं निर्मिमीत इति तथा हि दर्शयति श्रुतिरेष [illegible] वासाधु कर्म कारयति तं यमधो निनीषत इति पुण्यो वै पुण्येन कर्मणा भवति पा
पः पापेनेति च स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वं च दर्शयति ये यथा मां प्रपद्यन्ते तां
स्तथैव भजाम्यहमित्येवंजातीयका ॥ न कर्माविभागादिति चेन्नानादित्वात् ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
इति प्राक्सृष्टेरविभागावधारणान्नास्ति कर्म यदपेक्ष्य विषमा सृष्टिः स्यात् सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म कर्मा
पेक्षश्च शरीरादिविभाग इतीतरेतराश्रयत्वं प्रसज्येत अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम प्राग्विभागाद्वैचित्र्य
निमित्तस्य कर्मणोऽभावात्तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेत् नैष दोषोऽनादित्वात्संसारस्य भवेदेष दोषो यद्यादिमान् संसारः
स्यादनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते कथं पुनरवगम्यते अना
दिरेष संसार इत्यत उत्तरं पठति ॥ उपपद्यते चाप्युपलभ्यते च ॥ उपपद्यते च संसारस्यानादित्वमादिमत्त्वे हि संसारस्याकस्मा २३

दिंबरवनागुरुतरसंरंभे वाभाति तथापि परमेश्वरस्य लीलैव केवलेयमपरिमितशक्तित्वात् । यदि नाम लोके लीलास्वपि किं
चित्सूक्ष्मप्रयोजनमुत्प्रेक्ष्येत तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षितुं शक्यते आप्तकामश्रुतेः नाप्यप्रवृत्तिरुन्मत्तप्रवृत्तिर्वा सृष्टि
श्रुतेः सर्वज्ञश्रुतेश्च न चेयं परमार्थविषया सृष्टिश्रुतिः अविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच
इत्येतदपि नैव विस्मर्तव्यं ॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणा
निखननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय नेश्वरो जगतः कारणमुपपद्यते कुतो वैषम्यनैर्घृण्यप्रसंगात् कांश्चिदत्यंतसुख
भाजः करोति देवादीन् कांश्चिदत्यंतदुःखभाजः पश्वादीन् कांश्चिन्मध्यमभोगभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वर
स्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत तथा खलजनैरपि जुगुप्सितं निर्
घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्सर्वप्रजोपसंहरणाच्च प्रसज्येत तस्माद्वैषम्यनैर्घृण्यप्रसंगान्नेश्वरः कारणमित्येवं प्रा
प्ते ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते कस्मात्सापेक्षत्वात् यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्याता
मेतौ दोषौ वैषम्यं नैर्घृण्यं च न तु निरपेक्षस्य निर्मातृत्वमस्ति सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते किमपेक्षत इति चेद्धर्माधर्माव
पेक्षत इति वदामः अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा

श्री
२२

[illegible] कारणमपि तन्न [illegible] भगवान्नपि [illegible] अत्र [illegible] आदिना [illegible]

अन्यथा हि प्रयोजनस्याभावात् [illegible] धर्म [illegible] निर्विषयः स्यात्

मर्थ्यं योगं दर्शयति ॥ न प्रयोजनवत्त्वात् ॥ अन्यथा पुनश्चेतनकर्तृकत्वं जगत आक्षिपति । न खलु चेतनः परमात्मेदं ज
गद्बिंबं विरचयितुमर्हति । कुतः प्रयोजनवत्वात्प्रवृत्तीनां । चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्त्तमानो न मंदोपक्रमाम
पि तावत्प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरंभां भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीति गुरुतरसंरंभा चेयं प्रवृत्तिः यदुच्चावचप्रपंचं जग
द्बिंबं विरचयितव्यं । यदीयमपि प्रवृत्तिः चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत परितृप्तत्वं परमात्मनः श्रूय
माणं बाध्येत । प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात् । अथ चेतनोऽपि सन्नुन्मत्तो बुद्ध्यपराधादंतरेणैवात्मप्रयोजनं प्रवर्त्तमानो
दृष्टस्तथा परमात्मापि प्रवर्त्तिष्यत इत्युच्येत । तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत । तस्मादश्लिष्टा चेतनात्सृष्टि
रिति ॥ लोकवत्तु लीलाकैवल्यं ॥ तुशब्देनाक्षेपं परिहरति । यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं
किंचित्प्रयोजनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवंति । यथा चोच्छ्वासप्रश्वासादयोऽनभिसंधाय बा
ह्यं किंचित्प्रयोजनं स्वभावादेव संभवंति एवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनांतरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भवि
ष्यति । न हीश्वरस्य प्रयोजनांतरं निरूप्यमाणं न्यायतः श्रुतितो वा संभवति न च स्वभावः पर्यनुयोक्तुं शक्यते । यद्यप्यस्माकमियं जग २२

[illegible]

[illegible] आप्तकामत्व [illegible] इत्यर्थः १
[illegible] इत्यर्थः १

पारमार्थिक [illegible]

[illegible] रामः

पक्षेति स्वपक्षेपि समान एष दोषः समानत्वाच्च नान्यतरस्मिन्नेव पक्ष उपक्षेप्तव्यो भवतीति परिहृतस्तु ब्रह्मवादिना स्वपक्षे
दोषः॥ सर्वोपेता च तद्दर्शनात्॥ एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपंच इत्युक्तं तत्पुनः क
थमवगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति तदुच्यते सर्वोपेता च तद्दर्शनात्। सर्वशक्तियुक्ता च परा देवतेत्यभ्युपगंतव्यं कु
तः तद्दर्शनात्। तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः। सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्या
त्तोऽवाक्यनादरः सत्यकामः सत्यसंकल्पः यः सर्वज्ञः सर्ववित् एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः इत्ये
वंजातीयका॥ विकरणत्वान्नेति चेत्तदुक्तं॥ स्यादेतत् विकरणां परां देवतां शास्ति शास्त्रमचक्षुष्कमश्रोत्रमवागमना इत्येवंजाती
यकं कथं सा सर्वशक्तियुक्तापि सती कार्याय प्रभवेत् देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि संत आध्यात्मिककार्यकरणसंप
न्ना एव तस्मै कार्याय प्रभवंतो विज्ञायंते। कथं च नेति नेतीति प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः संभवेदिति चेद्यदत्र व
क्तव्यं तत्पुरस्तादेवोक्तं श्रुत्यवगाह्यमेवेदमतिगंभीरं ब्रह्म न तर्कावगाह्यं। न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्ये
न भवितव्यमिति नियमोस्तीति। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवतीत्येतदप्यविद्याकल्पितरूप
भेदोपन्यासेनोक्तमेव। तथा च शास्त्रं अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यकरणस्यापि ब्रह्मणः सर्वसा

नन्वणूनामवयवास्तत्रानुबद्धारंभकान्न भवन्ति किं तु कार्यवैचित्र्यानुमितास्तद्गताः शक्तय इत्यर्थः ... निरवयवत्वं तुल्यमित्याह तथेत्यादिना

मी. २१ कारणरासत्त्वे इत्यादिति। यतः आत्मन्यविद्यमानमपि स्वमहदादिस्वरूपानुपमर्द्देनैवानेकाकारा सृष्टिः प्रवर्त्तते। न तत्र रथान्तरस्य
योगान्तरप्रयोगाभावः स्वप्नदृष्टरथयोगान्तरप्रयुक्त इत्यादिना। लोकेऽपि देवादिषु मायाविषु स्वस्वरूपानुपमर्द्देनैव वि
विचित्रहस्त्यश्वादिसृष्टयो दृश्यन्ते। न चैते कल्पितत्वादविद्यमाना इति स्वरूपानुपमर्द्देनैवानेकाकारा सृष्टिर्भवतीति। स्वपक्षदोषाच्च।
परेषामप्येष समानः स्वपक्षे दोषः। प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छि
न्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षस्तत्रापि हि त्वत्पक्षस्य निरवयवत्वात् प्रधानस्य प्राप्नोतीति। निरवयव
त्वाभ्युपगमको यो वा। ननु नैवं तैर्निरवयवं प्रधानमभ्युपगम्यते सत्त्वरजस्तमांसि त्रयो गुणाः तेषां साम्यावस्था प्रधानं तैरे
वावयवैः तत्सावयवमिति। नैवं जातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्त्तुं पार्यते यतः सत्त्वरजस्तमसामप्येकैकस्य
समानं निरवयवत्वमेकैकमेवेतरद्वयानुगृहीतं सजातीयस्य प्रपञ्चस्योपादानमिति। समानत्वात्स्वपक्षदोषप्रसं
गस्य। तर्काप्रतिष्ठानात्सावयवत्वमेवेति चेदेवमप्यनित्यत्वादिदोषप्रसंगः। अथ शक्तय एव कार्यवैचित्र्यसूचिता अ
वयवा इत्यभिप्रायः। ता ब्रह्मवादिनोऽप्यविशिष्टाः। तथाऽणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि राम.
कार्त्स्न्येन संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसंगः। अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमव्याको २१

कित्साम्यावस्थागुणानां विकारः समुदायो वा आद्ये तस्यानवस्थत्वप्रकृतित्वविकारत्वात् द्वितीये ... समुदायस्यावयवत्वेन ... अथ निरवयवा गुणाः ... विधय
रिणामानां ... इत्यादिना ... अतः समानत्वात् ...
र्गे ... सावयवत्वसाधकतर्कस्याभासत्वात् गुणानां सावयवत्वे ... परिणामित्वेन ... परिणामसंभवादिति शंकते नेत्यादि

(left margin) अथवा ... निरवयवत्वं ... गुणानां ... सावयवत्वं ...

प्रकृतिलत्व

निरवयवत्वे ब्रह्मणः कृत्स्नेति विरोधः सावयवत्वे निरवयवशब्द[illegible] विरोधः [illegible] शब्दानुपलंभात् [illegible] प्रामाण्यमनुपपन्नमिति भावः [illegible]

५ इति निरवयवस्य [illegible] कूटस्थस्य [illegible] कल्पितेन नामरूप[illegible] [illegible] नास्ति वास्तवः [illegible] तदा २ [illegible] विकार[illegible] [illegible] निरवयवत्वादि [illegible] ५

पदीत्यपेक्ष२

ब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं। निरवयवं च ब्रह्म परिणमते न च कृत्स्नमिति। यदि निरवयवं ब्रह्म स्यान्नैव परिण
मेत कृत्स्नमेव वा परिणमेत। अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेतेति रूपभेदकल्पनात् सावयवमेव प्रसज्ये
त। क्रियाविषये हि अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्येवंजातीयकायां विरोधप्रतीतावपि विकल्पाश्र
यणं विरोधपरिहारकारणं भवति पुरुषतंत्रत्वाच्चानुष्ठानस्य। इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः संभवत्यपुरुष
तंत्रत्वाद्वस्तुनः। तस्माद्दुर्घटमेतदिति। नैष दोषः। अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सा
वयवं वस्तु संपद्यते। न हि तिमिरोपहतनयनेनानेक इव चंद्रमा दृश्यमानोऽनेक एव भवति। अविद्याकल्पितेन च नामरूपल
क्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते। पार
मार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते। वाचारंभणमात्रत्वाच्चाविद्याकल्पितस्य रूपभेदस्य न निरवयवत्वं
ब्रह्मणः कुप्यति। न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारहीनब्रह्मात्मभावप्र
तिपादनार्था त्वेषा तत्प्रतिपत्तौ फलावगमात्। स एष नेति नेत्यात्मेत्युपक्रम्याह अभयं वै जनक प्राप्तोऽसीति। तस्मादस्मत्पक्षे न क
श्चिदपि दोषप्रसंगोऽस्ति॥ आत्मनि चैवं विचित्राश्च हि॥ अपि च नैवात्र विवदितव्यं कथमेकस्मिन्ब्रह्मणि स्वरूपानुपमर्देनैवाने

नि[illegible] [illegible] कल्पिते [illegible] [illegible] भवतीति २

मी॰ हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति। तावानस्य महिमा ततो ज्यायांश्च पूरु-
२० षः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति चैवंजातीयकात्। तथा हृदयायतनत्ववचनात् सत्संपत्तिवचनाच्च।
यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् सता सोम्य तदा संपन्नो भवतीति सुषुप्तिगतविशेषणमनुपपन्नं स्या-
द्विकृतेन ब्रह्मणा नित्यसंपन्नत्वादविकृतस्य च ब्रह्मणोऽभावात्। तथेंद्रियगोचरत्वप्रतिषेधाद्ब्रह्मणो विकारस्यें-
द्रियगोचरत्वोपपत्तेः। तस्मादस्त्यविकृतं ब्रह्म। न च निरवयवत्वशब्दकोपः। श्रुतिप्रमाणत्वादेव निरवयवत्वस्याप्यभ्यु-
पगम्यमानत्वात्। शब्दमूलं च ब्रह्म शब्दप्रमाणकं नेंद्रियादिप्रमाणकं तद्यथाशब्दमभ्युपगंतव्यं शब्दश्चोभय-
मपि ब्रह्मणः प्रतिपादयति अकृत्स्नप्रसक्तिं निरवयवत्वं च। लौकिकानामपि मणिमंत्रौषधिप्रभृतीनां देश-
कालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यंते। ता अपि तावन्नोपदेशमंतरेण केवलेन
तर्केणावगंतुं शक्यंते। अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति। किमुताचिं-
त्यप्रभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्यते। तथा चाहुः पौराणिकाः। अचिंत्याः खलु ये भावा न तांस्तर्केण रामः
योजयेत्। प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणमिति। तस्माच्छब्दमूल एवातींद्रियार्थयाथात्म्याधिगमः। नन्वश २०

[illegible]

वितुमर्हतीति नास्त्येकान्ततः [illegible]॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥ चेतनमेकमद्वितीयं ब्रह्म क्षीरादिव
द्देवादिवच्चानपेक्षितबा[illegible]साधनं स्वयं परिणममानं जगतः कारणमिति स्थितं शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति। कृत्स्न
प्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत्सावयवमभविष्यत्ततो
स्यैकदेशः पर्यणंस्यतैकदेशश्चावास्थास्यत। निरवयवं तु ब्रह्म श्रुतिभ्योऽवगम्यते निष्कलं निष्क्रियं शान्तं निरवद्यं निरंज
नं। दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः इदं महद्भूतमनन्तमपारं विज्ञानघन एव स एष नेति नेत्यात्मास्थूलमन
ण्वित्याद्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः ततश्चैकदेशपरिणामासंभवात्कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्र
सज्येत। द्रष्टव्यतोपदेशानर्थक्यं चापन्नमयत्नदृष्टत्वात्कार्यस्य तद्व्यतिरिक्तस्य च ब्रह्मणोऽसंभवात् अजत्वादिशब्दकोपश्च। अथैतद्दोष
परिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दा उदाहृतास्ते प्रकुप्येयुः सा
वयवत्वे चानित्यत्वप्रसङ्ग इति सर्वथायं पक्षो न घटयितुं शक्यत इत्याक्षिपति॥ श्रुतेस्तु शब्दमूलत्वात्॥ तुश
ब्देनाक्षेपं परिहरति। न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति न तावत्कृत्स्नप्रसक्तिरस्ति कुतः श्रुतेः। यथैव हि ब्रह्मणो
जगदुत्पत्तिः श्रूयते एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते प्रकृतिविकारयोर्भेदेन व्यपदेशात् सेयं देवतैक्षत हन्ते

[illegible]

[illegible]

मी॰ दृष्टान्ते । कथं ब्रह्म चेतनं सदसहायं प्रवर्त्तते इति । देवादिवदिति ब्रूमः । यथा लोके देवाः पितर ऋषयः पुरुषा महाप्रभावाश्चे
१९ तना अपि सन्तोऽनपेक्ष्यैव किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि
प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते । मन्त्रार्थवादेतिहासपुराणप्रामाण्यात् । तन्तुनाभश्च स्वत एव तन्तून्सृजति
बलाका चान्तरेणैव शुक्रं गर्भं धत्ते । पद्मिनी चानपेक्ष्य किंचित्प्रस्थानसाधनं सरोऽन्तरात्सरोऽन्तरं प्रतिष्ठते । एवं चेतनमपि ब्रह्मा
नपेक्ष्य बाह्यसाधनं स्वत एव जगत्स्रक्ष्यति । स यदि ब्रूयात् य एते देवादयो ब्रह्मणो दृष्टान्ता उपात्तास्ते दार्ष्टान्तिकेन ब्रह्मणा स
मानां न भवन्ति । शरीरमेव ह्यचेतनं देवादीनां शरीरान्तरादिविभूत्युत्पादने उपादानं न तु चेतन आत्मा । तन्तुनाभस्य च
क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति । बलाका च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते । पद्मिनी
च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोऽन्तरात्सरोऽन्तरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेवाचेतना सरोऽन्तरोपसर्पणे व्याप्रिय
ते । तस्मान्नैते ब्रह्मणो दृष्टान्ता इति । तं प्रति ब्रूयात् नायं दोषः कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादिति । यथा
हि कुलालादीनां देवादीनां च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयः तथा ब्रह्म चेतन राम॰
मपि न बाह्यं साधनमपेक्षिष्यत इत्येतावद्वयं देवाद्युदाहरणेन विवक्षामः । तस्माद्यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव १९

[illegible]

[illegible] दधिभावापत्तेः [illegible] ८

[illegible] ईश्वरस्य [illegible] सहाय [illegible] ४

[illegible] सहायविशेषाभावे [illegible] क्षीरस्य [illegible] दधिभाव [illegible]

[illegible] कार्यं न संभवति [illegible] कुलाल [illegible] व्यभिचारः [illegible] कारणान्यपेक्षते [illegible]

[illegible] मापां तु [illegible] १

मेलनं २

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ ॥ चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते। कस्मादुपसंहारदर्शनात्। इह

८ हि लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तस्तत्तत्कार्यं कुर्वाणा दृश्यन्ते। ब्रह्म चा

सहायं तवाभिप्रेतं तस्य साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत तस्मान्न ब्रह्म जगत्कारणमिति चेन्नैष दोषः यतः क्षीरवद्द्रव्य

स्वभावविशेषादुपपद्यते। यथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति।

ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनमौष्ण्यादिकं कथमुच्यते क्षीरवद्धीति नैष दोषः। स्वयमपि हि क्षी

रं यां च यावतीं च परिणाममात्रामनुभवत्येव त्वार्यते त्वौष्ण्यादिना दधिभावाय। यदि च स्वयं दधिभावशीलता न स्यान्नैवौष्ण्या राम

दिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते। साधनसामग्र्या च तस्य पूर्णता संपाद्यते

[illegible] परिपूर्णशक्तिकं तु ब्रह्म न तस्यान्येन केनचित्पूर्णता संपादयितव्या। श्रुतिश्च भवति। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्य [illegible]

४ धिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति। तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् [illegible] ४

क्षीरादिवद्विचित्रः परिणाम उपपद्यते॥ ॥ देवादिवदपि लोके॥ ॥ स्यादेतदुपपद्यते क्षीरादीनामचेतनानामनपेक्ष्य

बाह्यं साधनं दध्यादिभावो दृष्टत्वात्। चेतनाः पुनः कुलाला[illegible] साधनसाम[illegible] [illegible]क्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना

[illegible] २ राम ५ ग्रं १

[illegible] कारणादग्नेर्दाहपाकादयः [illegible] संयोगविभागसंस्काराः [illegible] विशेषणात् [illegible] व्यभिचारं नाह देवादिवदिति

ज्ञानात् पूर्वं स्रष्टृत्वादिधर्माणां बाधाभावात् तदैव कल्पितभेदेन व्यवस्थोपपत्तेर्न किंचिद् दूषणमिति तिमइदं बाधाबाधितेति विभिन्नतविकल्पार्थः ६

कर्तृत्वादिबुद्धिधर्माध्यासे देहधर्माध्यासं दृष्टान्तयति नेति ५

मी. ~~जीवो ब्रह्मैकत्वं निर्दिष्टमित्यनेनाभेदनिर्देशोपि~~ दर्शितस्तत्त्वमसीत्येवंजातीयकः । कथं भेदाभेदौ विरुद्धौ संभवेयातां । नैष दोषः
१८ आकाशघटाकाशन्यायेनोभयसंभवस्य तत्र तत्र प्रतिष्ठापितत्वात् । दर्शितश्च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्र
तिबोधितो भवत्यपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वं समस्तस्य मिथ्याज्ञानविजृंभितस्य भेदव्यवहारस्य सम्यग्ज्ञा
कु नेन बाधितत्वात् तत्र कुतएव सृष्टिः कुतो वा हिताकरणादयो दोषाः । अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्य
विवेककृता हि भ्रान्तिर्हिताकरणादिलक्षणः संसारो न तु परमार्थतोस्तीत्यसकृदवोचाम । जन्ममरणच्छेदनभेदनाद्यभिमानव
दबाधिते तु भेदव्यवहारे सोन्वेष्टव्य इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोधिकत्वं हिताकरणादिदोषप्रसक्तिं निरु
णद्धि ॥ ॥अश्मादिवच्च तदनुपपत्तिः॥ ॥यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैदूर्या कृ
दयोन्ये मध्यमवीर्याः सूर्यकान्तादयोन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते । यथा चैकपृथिवीव्यपाश्र
याणामपि बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनकिंपाकादिषूपलक्ष्यते । यथा चैकस्याप्यन्नरसस्य लोहितादी लो
नि केशलोमादीनि च विचित्राणि कार्याणि भवन्त्येवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यत इत्यतस्तद राम.
नुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः । श्रुतेश्च प्रामाण्याद्विकारस्य च वाचारम्भणमात्रत्वात्स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः । १८

ननु वादरैकत्वे लक्षणिकं जीवेश्वरवैचित्र्यं कथं वक्ष्यमाणं त्वेवमिति एता:४ क्षत्रजीवागत कृते ३ शेषवत्क्षीणाभिन्नत्वात् जीववदिता घटमानं स्वतः प्रमाणोनिरवद्य वादश्रुतिः
तनुपपत्तिं दृष्टान्तैः परिहरति तत्रकारादीश्मादिवदित्यादिना ५ भिन्नं किं वर्णं स्वभोक्तृत्वादि विकारस्य मिथ्यात्वाज्जीवस्यैव तत्वदृष्टो नास्ति कर्मादिदं वस्यावीम स्याशेषदर्शीनः परमे
श्वरस्य दोषप्रसक्तिः अज्ञानविभिन्नकार्यमद्भूतिरेकरूपत्वात् मतिरेकेणाम् जीवादिदर्शि तन्न एकरूपेस्य प्रद
र्शीयविवेचद्रूपकत्वेपि अदर्शनिन व्यभिचारादित्यर्थः तस्मात्सत्यगभिन्नेब्रह्मणि समन्वयस्याविरोध इति सिद्धं ७

६ जीवाभिन्नो सन् स्वमतः स्वतंत्रश्चेतन स्वादितिन्यायविरुद्धो नासिध्यतीत्यभिप्राय

स एव परमात्मा सर्वज्ञत्वात्तथा जीवात्मकत्वआत्मनो नित्यात्मपरमतिपरदमेवंनभावनत्वांसुरवडःखादिवेदनाप्रसंगो नास्ति अविद्यावशात्स्वे शांतद्दृष्टाभिमान इति तथा चतेषां

स्वरवडःखादिवेदनामानप्रसंगस्तासीन इति नते यांबंधनागारनिवेशेष्यमासि इतिः कार्यं ममेति न हिताकरणादिदोषप्रसक्तिरिति राद्धांतः ६

सपरादेवताजीवमात्मशब्देन व्यपदिशतीन ब्रह्मणोभिन्नः शारीर इति दर्शयति।। तस्माद्यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेत्यतः स्वतंत्रः क
र्त्तासन् हितमेवात्मनः सौमनस्यकरं कुर्यान्नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालं। नहि कश्चिदपरतंत्रो बंधनागारमात्म
नः कृत्वानुप्रविशति। न च स्वयमत्यंतनिर्मलः सन्नत्यंतमलिनं देहमात्मत्वेनोपेयात्। कृतमपि कथंचिद्यद्दुःखकरं तदिच्छया ज
ह्यात्सुखकरं चोपाददीत। स्मरेच्च मयेदं जगद्बिंबं विचित्रं विरचितमिति। सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मयेदं कृतमिति
यथा च मायावी स्वयं प्रसारितां मायामिच्छयानायासेनैवोपसंहरत्येवं शारीरोपीमां सृष्टिमुपसंहरेत्। स्वमपि तावच्छरीरं शारीरो न श
क्नोत्यनायासेनोपसंहर्त्तुमेवं हितक्रियाद्यदर्शनादन्याय्या चेतनात्तु प्रक्रियेति गम्यते।। ।।अधिकं तु भेदनिर्देशात्।। तु शब्दः पक्षं
व्यावर्त्तयति। यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्तद्वयं जगतः स्रष्टृ ब्रूमो न तस्मिन् हिताक
रणादयो दोषाः प्रसज्यंते। नहि तस्य हितं किंचित्कर्त्तव्यमस्त्यहितं वा परिहर्त्तव्यं नित्यमुक्तत्वात्। न च तस्य ज्ञानप्रतिबंधः शक्तिप्रति
बंधो वा क्वचिदप्यस्ति सर्वज्ञत्वात्सर्वशक्तित्वाच्च। शारीरस्त्वनेवंविधस्तस्मिन् प्रसज्यंते हिताकरणादयो दोषाः। न तु तं वयं जगतः स्र
ष्टारं ब्रूमः। कुत एतद्भेदनिर्देशात्। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोन्वेष्टव्यः स विजिज्ञासितव्यः सता सोम्य तदा संपन्नो भ
वति शारीर आत्मा प्राज्ञेनात्मनान्वारूढ इत्येवंजातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म निर्दिशति। नन्वभेदनिर्देशोपि

यदि ब्रह्म जीवं तत्त्वरूपं प्रसज्यते दोषाः प्रसज्यंते न तु तं ब्रह्म महत्वमयः २

सोन्बे पृ॰ ४२

द्वितीये हेतौ [illegible] तन्त्वादयः [illegible] इति २   तत्रैव विलक्षणकार्यकारित्वं हेतुमाशंक्य [illegible] ८

त्री १

मी. वेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किं वान्यद्द्रव्यमिति स एव प्रसारितो यत्संवेष्टितं द्रव्यं तत्पट एवेति प्रसारणेनाभिव्यक्तो गृह्य-
१७ ते। यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते स एव च प्रसारणसमये विशिष्टायामविस्तारो गृह्य- दैर्घ्य
ते न संवेष्टितरूपादन्योऽयं भिन्नः पट इति। एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुविन्दादिकारकव्यापारादभिव्यक्तं
स्पष्टं गृह्यते। अतः संवेष्टितपटप्रसारितपटन्यायेनैवानन्यत्कारणात्कार्यमित्यर्थः॥ यथा च प्राणादि। यथा च लोके प्राणापान-
प्राणभेदेषु दिषु प्राणायामेन निरुद्धेषु कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते नाकुञ्चनप्रसारणादिकं कार्यान्तरं तेष्वेव प्रा-
णभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते। न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं स-
मीरणस्वभावाविशेषात्। एवं कार्यस्य कारणादनन्यत्वम्। अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा
येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति॥ ॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥ अन्यथा पुनश्चेतनकारणता
ऽऽक्षिप्यते चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते। कुतः। इतरव्यपदेशात्। इतरस्य शारीरस्य ब्रह्मा-
त्मत्वं व्यपदिशति श्रुतिः स आत्मा तत्त्वमसि श्वेतकेतो इति प्रतिबोधनात्। यद्वेतरस्य च ब्रह्मणः शारीरात्मत्वं व्यपदिशति तत्सृष्ट्वा तदेवानुप्रा- राम.
विशदिति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति १७

एवं जीवजगतो ब्रह्मानन्यत्वात् [illegible] करणार्थमुपसंहरति भवतश्चेति ५

दितिवक्तुनान्यथविवयेणकारणं ४

योःसंबंधःसंभवतिनसदसतोःसतोर्वा।अभावस्यचनिरूपाख्यत्वात्।प्रागुत्पत्तेरितिमर्यादाकरणमनुपपन्नं।सत्तांहिलोकेनेत्रेउ
हादीनांमर्यादादृष्टानाभावस्यानहिवंध्यापुत्रोराजाबभूवप्राक्शरीरात्मेरतोःमिश्रकादिस्वंज्ञातीयकेनमर्यादाकरणेननिरूपाख्यो
वंध्यापुत्रोराजाबभूवभवतिभविष्यतीतिवाविशिष्यते।यदिचवंध्यापुत्रःकारणव्यापारादूर्ध्वमभविष्यत्तत उपपादस्यतत्कार्यात्मा
विकारंकुर्यात्कस्त्रै(?)पारणामान्निषिध्येरतिप्रसंगात्समवायिकारणस्यैवात्मातिशयःकार्यमितिचेत्तत्कार्यत्वापत्तिस्तस्मात्
रादीनांवद्व्यक्तिदृक्षाद्धर्मोविनाभवतिप्रमानानिकार्याख्यांलभंतेइतिनकारणादन्यत्कार्यंवर्षशतेनापिशक्यंकर्तुंपितु।नयावि
मूलकारणमवोत्पात्कार्यात्रेननतेनकार्यकारणान्सर्वव्यवहारास्पदत्वंप्रतिपद्यते।एवंचकेःकार्यस्यप्रागुत्पत्तेःसत्त्वम
नन्यत्वंचकारणादवगम्यते।शब्दोनशब्दैतदवगम्यते।एवंसत्त्वेःसद्व्यपदेशिनःशब्दस्यादात्ततोन्नतोऽन्यःसंव्यपदेशीशब्दः ६
शब्दांतःसदेवसौम्येदमग्रआसीदेकमेवाद्वितीयमित्यादौनहिकश्चाऽसदेवेदमग्रआसीदित्यादौन्यत्रनलुपश्चिद्य कथमस
तःसज्जायेतेत्यादिप्रसेतेवसौम्येदमग्रआसीदितिवधारयति।नचेदंशब्दवाच्यस्यैवाशु(?)त्पत्तेःसकर्मत्वाद्येनकारणेनसामाना
विकारणस्यग्रहणमात्रानात्सत्वानन्यत्वप्रसिद्धतः।यदिन्तुप्रागुत्पत्तेस्सत्कार्यंस्यात्सदाचोत्पद्यमानंकारणेषुसमवेयान्नद
पत्कारणात्स्यातेनउपेनाञ्जुतंश्रुतंभवतीतीयेप्रतिज्ञापीतातासत्तानन्यत्वावगतेस्त्विदप्रतिज्ञासमर्थ्यते।परतद्य।यथावस

ऽंत्यात्कार्यात।ऽंत्यकार्यपर्यंतं६ ग्रं १ कार्यकारणयोर्भिन्नत्वं कार्यस्य पूर्व(?)मावश्यकोपलभ्यमानत्वात्ततोपिवपरिमाणत्व
मशीकादिवदनवानिनाम्नोपिचतस्त्रसंपद्यतेति॰

मी.
१६

तेनन्दूषणमेगवादः प्रतिवदितव्यः। यस्य पुनः प्रागुत्पत्तेः असत्कार्यं तस्य निर्विषयः कारकव्यापारः स्यादभावस्य विषयत्वानुपपत्तेः। एका
शाहननप्रयोजनेन स्वदृष्टाघनेकाष्ठधृषधृष्टि केवांत्समवायिकारणाविषयः कारकव्यापारः स्यात् क्षीशंव्यामोनिष्यानवस्थावैवं प्रसज्येत
तन्तुतेषवयवेष्ववयवेष्वित्युमन्येषामन्येषामवयवानां कल्पनीयत्वादवयवप्रत्ययवयवेवृत्तेः। तदेवंकारकव्यापारः स्वत्रात्र्याव्यापारः स्यात्
हि देवदत्तः स्तुत्वे समिधायमानत्त दहरेवपाटलिपुत्रे विसंनिधानता। पुनापदनेकद्वव्यरतौश्रनेकत्वपसंगात्। देवदत्तपत्तदग्वेधारिव
स्तुत्र्यपाटलिपुत्रनिवासिनोः भौत्वादिवत्स्पत्येके परिसमाप्तेरदोषइति चेन्न तत्प्रतिप्रसाभावावाधदिगोत्वादिवत्सत्येवं के परिसमाप्ते
वयवीस्यात्। यथा गोत्वं प्रतिव्यक्ति परिसमाप्यते। एवमवयव्यपि प्रत्यवयवं प्रत्यवयवं परिसमाप्यते तान नैवैवं नियते ग्रहसंख्यते प्रत्येकं परिसमाप्ते
वावयवितः कार्यता किकारणस्यैव कल्पाकुंगेणा विलनकार्यं कुर्यात् कुरसाव एकः कार्यं नवेवः एवं प्रागुत्पत्तेः कार्यस्यासत्वेऽपि
रकर्तृकानिरात्मिकावस्था उत्पत्तिश्रृण्णा मक्रियामास कर्तृके कथं विहुमर्ह ति गत्यादिवत्। क्रियावतो नाम स्याद कर्तृका चेति विप्रतिषे
धेता। घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किंतर्हि अन्यकर्तृकेति कल्प्या स्यात् यथा कपालादीनामुत्पत्तिरुच्यमाना न चैव कर्तृ
ता तथा समनिघ रउ पघतर स्फते कुलालादीनि कारणान्युत्पद्यते इत्युक्ते स्यात्। न च लोके घटोत्पत्तिरुक्ता कुलालादीनामप्युत्पद्यमानत्वप्रतीती राम.
पतेरु उत्पन्नता प्रतीतिस्त्वा प्रागुत्पत्तेः कारणास्तानातेवेष वोत्पत्तिः आत्मलाभ स्वकार्यस्योत्पत्तिरित्युच्यमाने तद्यथाम संसेव येनेति वन्न्याय्यं। कतो स्थि १६

[illegible]

रोवयवी वर्त्तेत। कोशावयवव्यतिरिक्ते त्ववयवेरसिः ~~[illegible]~~ पारादूर्ध्वं भविष्यतीति। वयं तु प्रब्रूमो वेष्वामुञ्च

स्य कार्याभावस्याप्राप्तत्वात्। किं शोभातायधार्वं ध्वामुञ्च कारकव्यापारादूर्ध्वं न भविष्यति एवं कार्याभावोपि कारकव्यापारादूर्ध्वं न भविष्यती

ति। नन्वेवं सति कारकव्यापारोऽनर्थकः प्रसज्येत प्रागेव सिद्धत्वात् कारकस्वरूपसिद्धये न कश्चिद्व्याप्रियेत एवं प्रागसिद्धत्वात्

नन्वेतावन्तु कार्यस्वरूपसिद्धयेपि न कश्चिद्व्याप्रियेत व्याप्रियते च मातः कारकव्यापारार्थवत्त्वायमन्यामहे प्रागुत्पत्तेरभावः कार्यस्ये

ति। नैवं दोषः यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्याकारोपि कारणस्यात्मभूत एव

अनात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति। न हि देवदत्तः संकोचितहस्तपादः प्रसारितहस्त

पादश्च विशेषेण दृश्यमानो वस्त्वन्यत्वं गच्छति। स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्य

त्वं भवति मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात्। जन्मोच्छेदानन्तरितत्वात्तत्र नैतद्युक्तमिति चेत्। न। क्षीरादीनामपि दध्याद्या

कारसंस्थानस्य प्रत्यक्षत्वाददृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगो

५ चरापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदृग्जन्मोच्छेदान्तरितत्वेन वेदसतः सत्त्वापत्तिः सतश्चा

सत्त्वापत्तिः तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसंगः तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसंगः पित्रादिव्यवहारलोपप्रसंगश्च

[illegible]

श्री.
१५

लोके दृश्यते तानद्व्यर्थे निर्मन्थिकोपादीयते न घटार्थि मिन्नीरं तदसत्कार्यवादे नोपपद्यते तस्याविशिष्टे हि शक्तत्वे सर्वं सर्वस्मा
त्तेव कस्मात् क्षीरादेव दध्युत्पद्यते न मन्थनिकायाः मन्थनिकाया एव घट उत्पद्यते न क्षीरात् तस्य घाविशिष्टे पि शक्तत्वे क्षीर एव दध्नः कश्चिद्दतिश
यो न मन्थनिकायां मन्थनिकायामेव घटस्य कश्चिद्दातिशयो नन्तीरे इत्युच्यते अतिशयो निशापवत्तात्याग वस्थायामसत्कार्यवादे नित्यता
र्यवाद सिद्धिश्च नित्ति स्वकारणस्य कार्यनियमार्थाकल्प्यमाना नान्यासती कार्ये नियच्छेदसत्त्वाविशेषादन्यताविशेषाभावात्तस्मात्का
रणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्यमपि च कार्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्य
मभ्युपगंतव्यं समवायकल्पनायामविसमवायस्य समवायिभिः संबंधेऽभ्युपगम्यमाने तस्य तस्यान्योन्यः संबंधः कल्पयि
तव्य इत्यनवस्थाप्रसंगः नेभ्युपगम्यमाने वा विच्छेदप्रसंगः समवायः स्वयं संबंधरूपत्वात् अनपेक्ष्यैवापरं संबंधं संबध्यते
गोचित इति स्वयं संबंधरूपत्वात् अनपेक्ष्यैव समवायं संबध्यते तादात्म्यप्रतिसिद्धं द्रव्यगुणादीनां समवायकल्पनानर्थक्यं
यच्च कार्यमवयवि द्रव्यं कारणेष्ववयवेषु वर्तमानं वर्तते किं समस्तेष्ववयवेषु वर्तेतोत प्रत्यवयवं प्रदिताव्यसमस्तेषु
ततो ऽवयवानुपलब्धिः प्रसज्येत समस्तावयवसंनिकर्षस्याशक्यत्वात् न हि बहुत्वं समस्तेष्वाश्रयेषु वर्तमानं व्यस्ताश्रयग्रहणेन गृह्यते अथ
न गृह्यते प्रत्यवयवं वर्तते तदारभ्यमाणाव यवव्यतिरेकेणावयवी नो वयवाः कल्प्येरन् येनारंभकेषु अवयवेषु अवयव १५

मिति वाक्यस्वभेदमानाभावात्कार्यस्य कारणादभिन्नसत्ताकत्वमिति सूत्रस्यार्थो नत्वसाहृत्यभावेति। इदानीं ततः कार्यत्वस्य प्रागुत्तरकालयोरसत्त्वाभावात्सत्ताव्यभिचार...
...विभाग क्रमेण तदभेदेन सत्तीय त्वत्परस्परतिभासमानयोः कार्यकारणयोरनन्यत्वमित्यर्थः न चैवं घटपटयोरप्येकसत्ताभेदेनान्यत्वं स्यादिति वाच्यं...
...तर्हि मृद्घटयोः कोविशेषः तादात्म्यमिति ब्रूमः ...कार्यं सत्तेन घटपटयोर्भेदेन सत्ता याभिन्ना तादात्म्यं कार्यकारणयोर्भेदे सत्यपि ...भावादभिन्न... मितिविशेषः

पासिकत्वात्प्रत्येत्यंतं तस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात्कार्यमित्यवगम्यते। यथा च कारणं ब्रह्म त्रिषु का-
लेषु सत्वं न व्यभिचरत्येवं कार्यमपि जगत्त्रिषु कालेषु सत्वं न व्यभिचरत्येकं च पुनः सत्वमतोऽप्यनन्यत्वं कारणात्कार्यस्य॥ १६॥ अ
सद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥ ननु क्वचिदसत्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रुतिः। असदेवेदमग्र
पि आसीदिति। असद्वा इदमग्र आसीदिति च तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्वमिति चेन्नेति ब्रूमः। न ह्ययमत्यंतासत्वाभि-
प्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः किं तर्हि व्याकृतनामरूपत्वाद्धर्मादव्याकृतनामरूपत्वं धर्मांतरं तेन धर्मांतरेणायमसद्व्यपदे-
शः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य। कथमेतदवगम्यते। वाक्यशेषात् यदुपक्रमे संदिग्धार्थं वाक्यं तच्छेषान्निश्ची-
यते। इह तावदसदेवेदमग्र आसीदित्यसच्छब्देनोपक्रमे निर्दिष्टं यत्तदेव पुनस्तच्छब्देन परामृश्य सदिति विशिनष्टि तत्सदासी-
दिति। असतश्च पूर्वापरकालासंबंधादासीच्छब्दानुपपत्तेश्च। असद्वा इदमग्र आसीदित्यत्रापि तदात्मानं स्वयमकुरुतेति वाक्यशे-
षविशेषणान्नात्यंतासत्वं। तस्माद्धर्मांतरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्र-
सिद्धं अतः प्राङ्नामरूपव्याकरणादसदिवासीदित्युपचर्यते॥ १७॥ युक्तेः शब्दांतराच्च॥ युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्वमनन्यत्वं च कारणा-
दवगम्यते शब्दांतराच्च। युक्तिस्तावद्वर्ण्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि

क्रियमाणत्वविशेषणं भूतस्य सार्थकं नीतिभावः

धि।

[illegible] दिकरणस्यैतद्विषयकबुद्धयाहत्वं हेतुः [illegible] [illegible] दर्शनादिसिद्धः ५ | अविच्छिन्न [illegible] ३ | २ [illegible] मतेन [illegible] शंकायेकदेशिपरिहारं [illegible] परमार्थ [illegible] [illegible] आत्माहाधेति ४

उपलब्धेौ २ | [illegible] २ उपलब्धेौ २

मी. दनन्यत्वं कार्यस्य यत्कारणभाव एव कारणस्य कार्यमुपलभ्यते नाभावे तद्यथा सत्यां मृदि घट उपलभ्यते सत्सु च तंतुषु पटो न च नि
१४ यमेनान्यभावेऽन्यस्योपलब्धिर्दृष्टा न ह्यश्वो गोरन्यः सन् गोर्भाव एवोपलभ्यते न च कुलालभाव एव घट उपलभ्यते सत्यपि निमित्त
नैमित्तिकभावेऽन्यत्वात् । नन्वन्यस्य भावेऽन्यस्योपलब्धिर्नियता दृश्यते यथाग्निभावे धूमस्येति । नेत्युच्यते उद्वापितेऽप्यग्नौ गोपालघ
टिकादिधारितस्य धूमस्य दृश्यमानत्वात् अथ धूमं कयाचिदवस्थया विशिंष्यादीदृशो धूमो नासत्यग्नौ भवतीति । नैवमपि कश्चिद्दो
रु. षस्तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वदामः न चासावग्निधूमयोर्विद्यते । भावाच्चोपलब्धेरिति वा सूत्रं न केवलं
[illegible] शब्दादेव कार्यकारणयोरनन्यत्वं प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः । भवति हि प्रत्यक्षोपलब्धिः कार्यकारण
योरनन्यत्वे तद्यथा तंतुसंस्थाने पटे तंतुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते [illegible] केवलास्तु तंतव आतानवितानवं
तः प्रत्यक्षमुपलभ्यंते । तथा च तंतुष्वंशवोंऽशुषु तदवयवाः अनया प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि । ततो
वायुमात्रमाकाशमात्रं चेत्यनुमेयं । ततः परं ब्रह्मैवाद्वितीयं तत्र सर्वप्रमाणानां निष्ठामवोचाम । सत्त्वाच्चावरस्य ॥ इ
तश्च कारणात्कार्यस्यानन्यत्वं यत्कारणं प्रागुत्पत्तेः कारणात्मनैवावरकालीनस्य कार्यस्य सत्त्वं श्रूयते सदेव सोम्ये राम.
दमग्र आसीदित्यादाविदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात् यच्च यदात्मना यत्र न वर्त्तते न तत्तत उत्पद्यते १४

आत्मा वा इदमेक एवाग्र आसी १ | एकः पदार्थ [illegible] कार्य [illegible] ५ | ४ [illegible]

[illegible]

नोपापत्वेनैवविनिघुज्यतेतापफलवत्वंनिषावेफलंतदैगमितिवक्तुंत्वतेनफलापकरूलनेरति। न हि परिणामवत्वविज्ञानात्

पारमार्थिकत्वमात्मनःफलतुल्यादितिवक्तुं...निमित्तात्मनो...दिनाएकत्वेकोन्तादर्शितंव्याभावेईश्वरका

रणापत्तिनाविरोधइतिचेत्...विद्यात्मकनामरूपबीजव्याकरणायेन्तवादीश्वरत्वस्यतस्माद्वात्मनआकाशःसंभूतइत्याक्षिवो

पोनित्यशुद्धबुद्धमुक्तस्वरूपात्सर्वज्ञात्सर्वशक्तेरीश्वराज्जगज्जन्मस्थितिलयाःतत्वादिव्यवहारउपपद्यतेनत्वैकत्वेनान्यस्यप्रतिनास

कुरोतितिनाम्यहिनानानित्यस्वरूपेति। पश्चात्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिश्रुतिवैपरमार्थावस्थायांसर्वव्यवहाराभावंवद

तिवेदान्तःतथेश्वरगीतास्वपिनकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभुःनकर्मफलसंयोगंस्वभावस्तुप्रवर्तते।नादत्तेकस्यचि

त्पापंनचैवसुकृतंविभुःअज्ञानेनावृतंज्ञानंतेनमुह्यन्तिजन्तवइतिपरमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावःप्रदर्श्यते

व्यवहारावस्थायांतूक्तःश्रुतावपीश्वरादिव्यवहारःएषसर्वेश्वरएषभूताधिपतिरेषभूतपालएषसेतुर्विधरणएषांलोकाना

मसंभेदायेति।तथेश्वरगीतास्वपिईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति।भ्रामयन्सर्वभूतानियन्त्रारूढानिमाययेतिसूत्र

कारोऽपिपरमार्थाभिप्रायेणतदनन्यत्वमित्याहव्यवहाराभिप्रायेणतुस्याल्लोकवदितिमहासमुद्रस्थानीयतांब्रह्मणःकथ

यतिअप्रत्याख्यायैवकार्यप्रपंचंपरिणामप्रक्रियांचाश्रयतिसगुणेषूपासनेषूपयोक्ष्यतइति॥ नाभावोपलब्धेः॥ इतश्चकार्यस्य

तर्हिकिलामतत्वं अस्यपितुर्वाक्यात् श्वेतकेतुर्विज्ञातवान् इतितात्रोक्तेः अतत्वात्त्वमसीत्यादौ सर्वः १

आदि

ननु सर्वस्यैतत्स्यापि स्वप्नोविश्वाजात्रक्रमलमिलादिर्लौकिकः सर्वप्रमाणं तत्वमसमर्थं वदतिति वैदिकश्च कथमपि सार्थकमपायाश्च प्रकृत्संसमलिङ्गमनन्तमिति तात्कालिकबाधाबाधाभ्यांव्यवहारस्तत्यादर्शस्य प्रतीकत्वं स्वप्रदृष्टान्तेनारयति आक्षेति २

मी. कोऽसेतन नचैषमवगतिर्नीसपतश्शतिशकं वक्तुं तेन हि विज्ञातावित्यादिश्रुतिभ्यः वक्तिसाधना नोचश्रवणादीनोवेदान्तुवचना

१३ दीनां च विधानान्न चैषमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुं अविद्यानिवृत्तिफलदर्शनाद्बाधकज्ञानान्तराभावाच्च प्रागात्मै

कत्वावगतेरव्याहतः सर्वस्सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम। तस्मादन्त्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे

समस्तस्यप्राचीनस्यभेददृष्टवस्तुरस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनावकाशोऽस्ति। ननु मृदादिदृष्टान्तप्रणयनात्परि

णामवद्ब्रह्मशास्त्रस्याभिमतमिति गम्यते परिणामिनो हि मृदादयोऽर्थाः लोके समधिगता इति। नेत्युच्यते सवाह्याभ्यन्तरोह्यज

आत्माजरोऽमृतोऽभयोऽत्र स एष नेति नेत्यात्मास्थूलमनणु इत्यादिभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमा

दहीपरिणामित्वंप्रल तद्राहित्यं ४ न्नह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुं स्थितिगतिवत्स्यादिति चेत्। न कूटस्थस्येति विशेषणात्। नहि कूटस्थस्य ब्र

ह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं संभवति। कूटस्थं च नित्यं ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम। न चैषयथा ब्रह्मात्मैकत्वद

र्शनं मोक्षसाधनं एवं जगदाकारपरिणामित्वदर्शनमपि स्वतन्त्रमेव कस्मैचित्फलायाभिप्रेयते प्रमाणाभावात् कूटस्थब्रह्मात्म

त्वविज्ञानादेव हि फलं दर्शयति शास्त्रं स एष नेति नेत्यात्मेत्युपक्रम्य अभयं वै जनक प्राप्तोऽसीत्येवंजातीयकं। तत्रैतत्सिद्धं भवति ब्रह्म

प्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्तत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद्ब्रह्मदर्श राम. १३

चे ५ यच्छ्रुतं फलं तत्राकांक्षमेवेति निश्चितः ५ त २

फलवद्ब्रह्मदर्शनसंनिधानफलं अंगं भवति तदेवसमाम्नायमानं तदर्थं स्तरस्यापगमायतिष्ठते तदर्थं तत्तरार्थमित्याह नच फलवत्संनिधावफलं तदङ्गमिति अतो न परिणामपरत्वमस्येत्यर्थः ४

अवगतिर्हेतुः। अदृष्टादेरवस्थापि स्वप्नकालिकस्य स्वप्नदृष्टवस्तुनः फलं चेतसं याति प्रमितिमवगतिशब्दार्थः २

स्वप्नस्यावगतेः स्वप्नदेहधर्मत्वेऽकल्पितस्य मयाप्रतीतः स्वप्नो दृष्ट इत्यबाधितावगतिप्रतिसंधानं न स्यात् प्रतीतौ देहभेदे प्रत्यनुसंधानादर्शनाद्देहान्तरस्यानुसंधाने सर्पः ४

स्य क ष्ठ स्य ६ तो २

ध्रियते नाविद्यागतं शंका न साधाराणा वृगाह नादित्वयो जननेऽक्षिपत इति [illegible] नैव दोषः शंका विषादिनिमित्तमरणादिकार्योपल
ब्धेः स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात् तत्कार्यमप्यनृतमेवेति चेद् ब्रूयात् तत्र ब्रूमः। यद्यपि स्वप्नदर्शनाव
स्थस्य सर्पदंशनोदकस्नानादिकार्यमनृतं तथापि तदवगतिः सत्यमेव फलमिति ब्रूमः प्रतिबुद्धस्याप्यबाध्यमानत्वात्। नहि स्वप्नाद्दुत्थितः स्वप्न
दृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित्। एतेन स्वप्नदृशो देहमात्र(?)बोधनेन देहमा
त्रात्मवादो दूषितो वेदितव्यः। तथा च श्रुतिः यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्श
ने इत्यसत्येन स्वप्नदर्शनेन सत्यस्य समृद्धेः प्रतिपत्तिं दर्शयति तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु न चिरमिव जीविष्यती
ति विद्यादित्युक्त्वाथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्तीत्यादिना तेनैतेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्य
त इति दर्शयति प्रसिद्धं चेदं लोके अन्वयव्यतिरेककुशलानामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यत ईदृशेनासाध्वागम इ
ति। तथा अकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः। अपि चान्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकं ना त४
परं किंचिदाकांक्षमस्ति यथा हि यजेतेत्युक्ते किं केन कथमित्याकांक्ष्यते नैवं तत्त्वमसीत्युक्ते किंचिदन्यदाकांक्ष्यमस्ति सर्वात्मै
कत्वविषयत्वावगतेः सति ह्यन्यस्मिन्नवशिष्यमाणे आकांक्षा स्यान्न त्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोऽन्योऽर्थोऽस्ति यः

रेखास्वरूपत्वाभिमतसत्याः अकारादयोऽक्षरा यन्ते इति प्रसिद्धं दृष्टसर्पः ३

नहि संकेतं विना रेखास्वरूपेण रेखाभेदेनायं वर्णः इत्येतद्व्यवहारः इति संकेतरूपति अपि तु दृश्यते क्षय २

रखाभेदो अकाररेखा आकाररेखेति ३

धूमकल्पितधूमेनानुमितस्य वह्नेरिव प्रमेयताभावेऽपि तेनावः

पी.
१२

पारमार्थिकं दर्शयति मिथ्याज्ञानविजृंभितं च नानात्वमुभयसत्यतायां हि कथं व्यवहारगोचरोपि जंतुरनृताभिसंधवध्येत। मृ
त्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति च भेददृष्टिमपवदन्नेतदेव दर्शयति। न चास्मिन्दर्शने ज्ञानान्मोक्ष इत्युपपद्यते। सम्य
ग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात्। उभयसत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञान
मपनुद्यत इत्युच्यते। ननु एकत्वैकांताभ्युपगमे नानात्वाभावात्प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन्निर्विषयत्वात्स्थाण्वा
दिष्विव पुरुषादिज्ञानानि। तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात्तदभावे व्याहन्येत। मोक्षशास्त्रस्यापि शिष्यशासित्रादि
भेदापेक्षत्वात्तदभावे व्याघातः स्यात्। कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येतेति। अत्रोच्यते। नैष
दोषः। सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात्सत्यत्वोपपत्तेः। स्वप्नव्यवहारस्येव प्राक्प्रबोधात्। यावद्धि न सत्यात्मैकत्वप्रति
पत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते। विकारानेव त्वहं ममेत्यविद्ययात्मात्मीयभावेन स
र्वो जंतुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा। तस्मात्प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारो यथा
सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान्भावान्पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक्प्रबोधान्न च प्रत्यक्षा राम.
भासाभिप्रायस्तत्काले भवति तद्वत्। कथं त्वसत्येन वेदांतवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत। न हि रज्जुसर्पेण दष्टो १२

(left margin) ब्रह्मैकत्वे ... चैव
(right margin) क्षप्रमाणानि सह ४

सत्यत्वेन बाधाभावः ... मिथ्यात्वनिश्चयः ५ शरीरादौ नह्यमित्वाभिमानाभावे न पुत्रादौ ममेत्यभिमानाभावे न ४
सत्यत्वाभिमानोपपत्तेः ५

र्थः प्रपञ्चो नानाकार्यस्य उपक्रमकं २

अनेकाभिः शक्तिभिः स्वाधीनप्रवृत्तिभिः परिणामैर्युक्तमित्यर्थः १

कारणाकारणत्वशालाभ्यां विकारसत्तानिषेधात्परिणामवादः श्रुति लोक ३ बाध्य इत्यर्थः ४

वै परमकारणस्यैवैकस्य सत्य ५

अनेकात्मकत्वे प्रत्युक्तः ३

शक्तिप्रवृत्तियुक्तं ब्रह्म । अत एकत्वमनेकत्वं चोभयमपि सत्यमेव । यथा वृक्ष इत्येकत्वं शाखा इति च नानात्वं यथा च समुद्रा-
त्मनैकत्वं फेनबुद्बुदतरंगाद्यात्मना नानात्वं यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वं तत्रैकत्वांशेन ज्ञानान्मोक्ष-
व्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति एवं च मृदादिदृष्टांता अनुरूपा भवि-
ष्यंतीति नैवं स्यात् मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टांते सत्यत्वावधारणात् वाचारंभणशब्देन च विकारजातस्यानृ-
तत्वाभिधानाद्दार्ष्टान्तिकेऽप्यैतदात्म्यमिदं सर्वं तत्सत्यमिति [illegible]त्वावधारणात् स आत्मा तत्त्वमसि श्वेतकेतो इति च शारी-
रस्य ब्रह्मभावोपदेशात् । स्वयंप्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नान्तरप्रसाध्यमतश्चेदं शास्त्रीयं ब्रह्मा-
त्मत्वमवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनां बाधिते च शारी-
रात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत दर्श-
यति च यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना ब्रह्मात्मदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्ष-
णस्य व्यवहारस्याभावं न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुं तत्त्वमसीति ब्रह्मात्म-
भावस्यानवस्थाविशेषनिबंधनत्वात्तस्करदृष्टांतेन चानृताभिसंधस्य बंधनं सत्याभिसंधस्य मोक्षं दर्शयन्नेकत्वमेवैकं

स्वभावो ब्रह्माविद्यातत्कार्यकृतः स्वाभाविकः ४

२ मनुष्यमात्रस्यादिव्यवहारः समस्त एव मोक्षावस्थायां नास्ति बन्धावस्थायामस्तीति तर्हि इति तन्नेत्याह न चायमिति संसारस्य मलत्वेन दर्शनाभावाज्जीवस्य मलत्वं न स्यादिति दृष्टा भेदयोरेकदैकत्र विरोधादितो संसारिब्रह्माभेदस्य सदातनत्वावगमात् संसारो मिथ्यैवेत्यर्थः २

किंच यथा लोके कश्चित्तस्करबुद्ध्या भटैर्गृहीतो न तथा दीवे तप्तपरशुं गृह्णाति स दह्यते बध्यते च तथा ना[illegible]न्यथावादी बध्यते सत्यवादी चेन्न दह्यते मुच्यते च तथैतदात्म्यमिदं सर्वमित्येकत्व शोभिमुच्यते इति श्रुतेः दृष्टांतेनैकत्वं सत्यं नानात्वं मिथ्येत्याह तस्करेति

[illegible] सत्यकामस्य [illegible] नैकत्वं २

विकारो अनृतं ५ … विभाज्य … एकेन … ऽ ४१ वाचारम्भ[illegible] नाममात्रं विकारो न कारणात् पृथगस्तीत्येव कारणार्थः … मृ[illegible] मिति २

बोधयितुमारभ्यत इति आरब्धं ४ शब्द १ … भवेदित्यत्र हेतुबोधिका श्रुतिः प्रतीत्यादि ३ … अत्यर्थम … वाचैवेति … रामकृष्ण

श्री० द्वो त्वं प्रभो तु भोऽप्य विज्ञातं … तावदेक विज्ञानेन सर्वविज्ञानं प्रतिज्ञातम् दृष्टान्तापेक्षायामुच्यते। यथा सोम्यैकेन मृत्पिण्डेन सर्वं

११ मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति। एतदुक्तं भवति। एकेन मृत्पिण्डेन परमार्थतः मृदात्मना

विज्ञातेन सर्वं मृन्मयं घटशरावोदंचनादिकं मृदात्मत्वाविशेषाद्विज्ञातं भवेद्यतो वाचारंभणं विकारो नामधेयं वाचैव केवल

मस्तीत्यारभ्यते विकारो घटशरावोदंचनमिति न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति नामधेयमात्रं ह्येतदनृ

तं मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टान्त आम्नातः तत्र श्रुताद्वाचारंभणशब्दाद्दार्ष्टान्तिकेपि ब्रह्मव्यतिरेकेण कार्य

मिथ्यात्वे जातस्याभाव इति गम्यते। पुनश्च तेजोबन्नानां ब्रह्मकार्यतामुक्त्वा तेजोबन्नकार्याणां तेजोबन्नव्यतिरेकेणाभावं ब्रवीत्य

पागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यादिनारंभणशब्दादिभ्यश्च। आदिशब्दादैत

दात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि। इदं सर्वं यदयमात्मा। ब्रह्मैवेदं सर्वं। आत्मैवेदं सर्वं। नेह नानास्ति किंचन। नेत्ये

वमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्तव्यं नह्यन्यथा एकविज्ञानेन सर्वविज्ञानं संपद्यते तस्माद्यथा घटक

रकाद्याकाशानां महाकाशानन्यत्वं यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात्स्वरूपेणानु राम

पाख्यत्वादेवमस्य भोग्यभोक्त्रादिप्रपंचजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यं। नन्वनेकात्मकं ब्रह्म यथा [illegible] नेकशाख एवमनेके ११

आ[illegible] … इत्येवमाहपुनः … ६ … प्रतीतिः … २ … ३ … १

५ अपागादग्नेः … कारणमात्रत्वात् … तेजोबन्नानां … वाचारंभणमात्रत्वात् … स्वरूपेणानुपाख्यत्वात् … अन्यत्वादनन्यत्वमिति … २ … इत्यभिप्रायः

अतिदेशत्वेऽपरीसे विनिगमकमाह वैदिकस्येति ॥

सत्कार्यत्वात्मासंगतात्प्रकाशत्वात् धंशैः

देवमादिभिः सत्कार्यत्वांशेन स्वीकृत इति प्रधानतानुपदेशः

वैदिकस्य दर्शनस्य प्रत्यासन्नत्वात् दूरतरतर्कबलोपेतत्वाद् देशानुसारि मिश्रकैश्च शिष्टैः कैश्चित् विदेशेन परिगृहीतत्वा
त्प्रधानकारणवादं तावदुपाश्रित्य परतर्कनिमित्त आक्षेपो वेदांतवाक्येषु उपजीवितः स परिहृतः । इदानीमण्वादिवाद
व्यपाश्रयेणापि केचिन्मंदमतयो वेदांतवाक्येषु पुनस्तर्कनिमित्तमाक्षेपमाशंकेरन्निति अतः प्रधानमल्लनिबर्हणन्या
येनातिदिशति परिगृह्यंत इति परिग्रहा न परिग्रहाश्च परिग्रहाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः एतेन प्रकृतेन प्रधा
नकारणवादनिराकरणकारणेन शिष्टैर्मन्वादिभिः व्यासप्रभृतिभिः केनचिदप्यंशेनापरिगृहीता ये अण्वादिकारणवादास्ते
ऽपि प्रतिषिद्धतया व्याख्याता निराकृता द्रष्टव्याः तुल्यत्वान्निराकरणकारणस्य । नात्र पुनराशंकितव्यं किंचिदस्ति । तुल्य
मत्रापि परमगंभीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्य चाप्रतिष्ठितत्वमन्यथानुमानेऽप्यविमोक्ष आ
गमविरोधश्चेत्येवंजातीयकं निराकरणकारणं ॥ ॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ ॥ अन्यथा पुनर्ब्रह्म
कारणवादस्तर्कबलेनैवाक्षिप्यते । यद्यपि श्रुतिः प्रमाणं स्वविषये भवति तथापि प्रमाणान्तरेण विषयापहारे
ऽन्यपरा भवितुमर्हति यथा मंत्रार्थवादौ तर्कोऽपि स्वविषयादन्यत्राप्रतिष्ठितः स्यात् यथा धर्माधर्मयोः । किमतो यद्येवं
मतः इदमयुक्तं यत्प्रमाणांतरप्रसिद्धार्थबाधनं श्रुतेः । कथं पुनः प्रमाणांतरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इत्युच्यते । प्रसि

स्र. २

मी. १० संश्लेषादिलक्षणाश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेपि फेनतरंगादीनामितरेतरभावापत्तिर्भवति। न चै
तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति एवमिहापि न च भोक्तृभोग्ययोरितरेतरभावापत्तिर्न च परस्माद्ब्रह्म
णोऽन्यत्वं भविष्यति। यद्यपि भोक्ता न ब्रह्मणो विकारस्तत्सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भो
क्तृत्वश्रवणात्। तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभाग आकाशस्येव घटाद्युपाधिनिमित्त इत्यतः परमकारणा
द्ब्रह्मणोऽनन्यत्वेप्युपपन्नो भोक्तृभोग्यलक्षणो विभागः समुद्रतरंगादिन्यायेनेत्युक्तं॥ तदनन्यत्वमारंभणशब्दादिभ्यः॥ अ
भ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितो न त्वयं विभागः परमार्थतोऽस्ति यस्मा
त्तयोः कार्यकारणयोरनन्यत्वमवगम्यते। कार्यमाकाशादिकं बहुप्रपंचं जगत्कारणं परं ब्रह्म। तस्मात्कारणात्परमार्थतो
एषत्वमापदि सं ऽनन्यत्वे व्यतिरेकेणाभावः कार्यस्यावगम्यते। कुतः आरंभणशब्दादिभ्यः। आरंभणं नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यव
स्थितार्थविषयत्वोपपत्तेस्तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यम्। अतः सि
द्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वम्। अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव प्रसज्येत। अत आगम
वशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितं॥ ॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः राम. १०

कारमार्थि ८ वि ४

८ तस्येवके कार्यकारणत्वव्याघातं इत्यत आह व्यतिरेकेणेति। कारणात्पृथक्सत्वलाभशून्यत्वं कार्यस्य साध्यते नैकत्वमित्यर्थः। आरंभणेति अनेन ८ कादशपंक्तौ ८ ७ स्य प्रथमपंक्तौ शब्दे
तस्य भिन्नत्वानैकत्वावगम्यत इत्यर्थः ४४ त्यादि ८ ए पं ४
इतो

प० अवतं ः श्रोधयनस्य नोकदशाधस्तन चतुर्थ पंक्तौ मिन्यतोविद्यानं
लब्धीत्यारभ्येकादशपनोढपत्र प्रथम पंक्तिस्थ ... न्यविज्ञापंद
नकृष्यते

ननु सर्वतार्किकैर्मिद्विज्ञानं निश्चित तत कैश्चिन्मतिः हेतुरत आह नच शब्दं नैतति
एकरूपेणावस्थितोविषयो यस्य तत् तर्कप्रभवं कथं सम्यग्ज्ञानं भवेदिति योजना २

सपरमार्थोलोकेनतद्विषयंज्ञानमपिसम्यग्ज्ञानमितिरूच्यते यथाग्निरूपाइति। नचैवंसतिसम्यग्ज्ञाने पुरूषाणां विप्रतिपत्तिर
नुपपन्नाननुज्ञानानांतत्त्वेनाविरोधात्प्रसिद्धाविप्रतिपत्तिर्युद्धेकेनचित्तार्किकैरेतोदमेवसम्यग्ज्ञानमितिप्रतिपादितेनतदपरेणाथा
पतितेनाविप्रतिपत्तिः प्रतिपादितेततोपरेणार्थापत्त्या प्रापितनइतिसिद्धंलोकेवयथैकरूपेणावस्थितविषयेतर्कप्रभवंसम्यग्ज्ञानंभवतीतानवप्रधानवा
तर्कैरिदानुगतमइतिसर्वैःतार्किकैःपरिगृहीतः येनतदीयमतंसम्यग्ज्ञानमितिप्रतिपद्येमहि। नचैवंसतेऽतीतानागतवर्तमाना
स्तार्किकाएकस्मिन्देशकालेचसमाहर्तुंयेनतन्मतिरेकरूपैकार्थविषयासम्यग्भवतिइतिस्यात्। वेदस्यतुऽवस्थितस्वभावः इयोद
स्यचांकपुरूचतुर्थपंक्तिमारभ्य चतुर्थाईकानेकपुरूषार्थंपतः गोलोकेभोक्ताचेतनः शारीरोभोग्याः शब्दादयोविषयाइतिव
याभोक्तादेवदत्तोभोग्यऽदनइति। तस्यचविभागस्याभावः प्रसज्येतयदिभोक्ताभोग्यभावमापद्येतभोग्यंवाभोक्तृभावमापद्ये
ता। तयोश्चेतरेतरभावापत्तिःपरमकारणाद्ब्रह्मणोऽनन्यत्वात्प्रसज्येतानवास्यप्रसिद्धस्याविभागस्यबाधनंयुक्तं। यथात्वद्यत्वे
भोक्तृभोग्ययोर्विभागोदृष्टस्तथातीतानागतयोरपिकल्पयितव्यस्तस्मात्प्रसिद्धस्यास्यभोक्तृभोग्यविभागस्याभावप्रसंगादयु
क्तमिदंब्रह्मकारणतावधारणमितिचेत्कश्चिद्चोदयेत्। तंप्रतिब्रूयात्स्याल्लोकवदिति। उपपद्यतएवायमस्मत्पक्षेपिविभागः
एवंलोकेदृष्टत्वात्। तथाहि। समुद्रादुदकात्मनोऽनन्यत्वेपितद्विकाराणांफेनवीचीतरंगबुद्बुदादीनामितरेतरविभागइतरेतर

[illegible] तर्कजातीयत्वात् [illegible] तर्कः प्रतिष्ठितः यथा आयुर्वेदे [illegible] प्रतिष्ठितत्वसाध्या [illegible] भिचारः इति [illegible] सर्वतर्काणामप्रतिष्ठितत्वं हेत्वभावादि [illegible]
[illegible] तर्काणां [illegible] साध्य [illegible] दृष्टत्वादप्रतिष्ठि [illegible] नानुमानात्मकतर्कस्य [illegible] व्यवहारहेतुत्वान्नाप्रतिष्ठितत्वात् सर्वतर्केति अध्वादिव [illegible]
[illegible] सामान्येन [illegible] तद्विषये [illegible] सुखदुःख [illegible] हेतुत्वानुमित्या प्रवृत्त्यादिरित्यर्थः २ सर्वतर्काणामप्रतिष्ठायां [illegible] इत्यादि [illegible] ६
[illegible] धर्म [illegible] तेन हेतुना

मी.
९

वयमनुमास्यामहे यथा नाप्रतिष्ठादोषो भविष्यति। न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुं। एतदपि हि तर्काणामप्र-
तिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते केषांचित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जातीयानां तर्काणामप्रतिष्ठितत्वकल्प-
नात्। सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसंगः। अतीतवर्त्तमानाध्वसामान्येन ह्यनागतेप्यध्वनि सुखदुःखप्राप्तिपरिहारा-
य प्रवर्त्तमानो लोको दृश्यते। श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्यगर्थनिर्द्धारणं तर्केणैव वाक्यवृत्तिनिरूपणरूपेण
क्रियते। मनुरपि चैवमेव मन्यते प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता इति आर्षं धर्मोपदेशं च वे- अधर्मादिविर्जितं
दशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः इति च ब्रुवन्। अयमेव च तर्कस्यालंकारो यदप्रतिष्ठितत्वं नाम एवं हि सा-
वद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति। न हि पूर्वजो मूढ आसीदित्यात्मनापि मूढेन भवितव्यमिति किंचिद-
स्ति प्रमाणं तस्मान्न तर्काप्रतिष्ठानं दोष इति चेत् एवमप्यविमोक्षप्रसंगः। यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलक्ष्यते
तथापि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्य न हीदमतिगंभीरं भावयाथात्म्यं मुक्तिनिबंधनमाग- [illegible]
ममंतरेणोत्प्रेक्षितुमपि शक्यं रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरो लिंगाद्यभावाच्च नानुमानादीनामिति चावोचाम। अ- राम.
पि च सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः। तच्च सम्यग्ज्ञानमेकरूपं वस्तुतंत्रत्वात्। एकरूपेण ह्यवस्थितो योर्थः ९

[illegible] एकरूपं [illegible] ज्ञाने
[illegible] नेकरूपमित्यर्थः ७
२ [illegible] मुक्तिनिबंधनं [illegible] अविमोक्ष [illegible]

र्दिकमस्य पुरुषस्योपादानं भोग्यमस्ये नेत्यनियमः बद्धमुक्तव्यवस्थाव्याप्तिद्व
रेष यंतकानां भेदाः संघातविशेषाः प्रधानेऽलीयंते रजसां भेदास्तत्तल्लीयंतर्कतोक्ते
तेतांकैतालीनानां पुरुषसकार्यवत्त्वात्स्यर्थः समुदितस्य ३

सत्कार्यस्याविरुद्धकारणात्मनासत्वामोगात्क्तुरंघ्वसैैैमायंदेवोनकार्यमिच्यारत्यवर्जदिन इतिमंतव्यं २

विलक्षणत्वात्रैर्धं जगद्ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामपि समानमेतत्बुद्ध्यादिहीनात्प्रधानाद्बुद्ध्यादिमतो जगत उत्पत्ते
रभ्युपगमात्। अथ तत्र कथंचिद्विलक्षणात्कार्योत्पत्त्यभ्युपगमात्समानः प्रसङ्गः प्रत्येतव्यः साकार्यवादप्रसंगः। तथापीतो कार्यस्य कारणे ऽविभा
गाभ्युपगमात्तुल्यमसंगोपि समानः। तथा च दितस्यं विविशेषशुद्धिकारणे पीता व विभागात्मतां गते ब्रह्मणि स पुरुषस्योपादानमिदमस्ये
ति प्रोक्तत्वयाप्रतिपुरुषस्यैवनियतानां भेदानां तथैव पुनरुत्पत्तौ न नियन्तुं शक्यं ते कारणाभावादिनैव कारणे न नियमेऽभ्युपगम्यमा
ने कारणाभावसाम्यान्मुक्तानामपि पुनर्बंधप्रसंगः। अथ केचिद्भेदा अपीताव विभागमापद्यंते केचिन्नेति चेत्तयेनापद्यंते तेनैव प्रधा
नकार्यत्वेन प्राप्नोती त्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन्पक्षे वो दयितव्याः एवं तावत्स दोषतामेवेषां द्वयरस्य वनूपाद्य पि
तत्वात्॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः॥ इतश्च नागममात्रप्रम्ये ऽर्थे केवलेन तर्केणाप्रत्यवस्थातव्यं
यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबंधनास्तर्का अप्रतिष्ठिता भवंति उत्प्रेक्षाया निरंकुशत्वात्तथा हि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षि
तास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यंते तैरप्युत्प्रेक्षिताः संतो ऽन्यैराभास्यंत इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुं
पुरुषमतिवैरूप्यात् अथ कस्यचित्प्रसिद्धमाहात्म्यस्य कपिलस्य अन्यस्य वा संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत एवमप्यप्रतिष्ठित
त्वमेवाप्रसिद्धमाहात्म्याभिमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात् अथोच्यते अन्यथा

जाग्रतस्तुसोः स्वप्नेनात्मनोऽस्य [illegible] कालेषु [illegible] इत्यर्थः १ [illegible]

अत्र [illegible] या अवस्थाया अत्र [illegible] स्थितिलव [illegible] आभाः इति [illegible]

२ यदा तत्त्वमसीत्युपदेशकाले प्रबुध्यते मायानिद्रां त्यजेत्येतत् [illegible] तं ईश्वरमात्मत्वेनानुभवतीत्यर्थः

मायाख्यानुपादानमित्यस्या [illegible] नवभासेति ५

मी० ८ स्वपतइति। यथा च स्वप्नदृग्गेहः स्वप्नदर्शनमायया न संस्पृश्यते प्रबोधसंप्रसादयोरनन्वागतत्वात्। एवमवस्थात्रयसाक्ष्येकोऽप्यवि

वाद्यवस्थात्रयेणाव्यभिचारिणा न संस्पृश्यते मायामात्रत्वात्। यस्मादात्मनो [illegible] तथात्मनोऽवभासनेरज्ज्वा इव सर्प

दिभावेनेति। अत्राहुर्वेदान्तार्थसंप्रदायविद्भिराचार्यैः अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदे

सुखितनमा ४ दृति। तत्र यदुक्तमपीतौ कारणस्यापि कार्यस्येव दोषासंग इत्येतदयुक्तं [illegible] समस्तस्य विभागस्याविभागप्रा

प्तौ पुनर्विभागेनोत्पत्तौ नियमकारणाभावात् [illegible] इत्येतदपि दोषा [illegible] तत्रावादो [illegible] समाध्यादावविभागाविभागा

विभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवत्येव [illegible] नित्यं भवति [illegible]

[illegible] ५ जाः [illegible] सुप्तो [illegible] वा [illegible] वा [illegible] वा [illegible] वाय [illegible] तेन [illegible]

भवेतीति। यथा त्वविभागे विपरमात्मनि मिथ्याज्ञाननिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते एवमपीतावपि

[illegible] कार्याणां ४ मिथ्याज्ञाननिबद्ध एव विभागः [illegible] नेतिनवुक्तौ [illegible] पुनरुत्पत्तिप्रसंगः [illegible] सम्यग्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात्

यत्पुनरेतदुक्तं [illegible] विकल्प [illegible] दृष्टं जगद् पीताविव विभक्तमेव परेण ब्रह्मणा [illegible] भवति [illegible] तिसोप्यनभ्युपगमादेव प्रतिषिद्धस्तस्मात् राम

मे [illegible] पनिषदे दर्शने। स्वपक्षदोषाभावः। स्वपक्षे चैते [illegible] साधारणा दोषाः [illegible] ८

प्र दो २ प ३ [illegible] शाङ्करविभुः देशो वा ५

[illegible] भवंति [illegible] ५

दर्शने किंचिदसामंजस्यमस्ति यत्तावदभिहितं कारणमपिगच्छत्कार्यं कारणमात्मीये ३

~~[illegible]~~ मधुरं जलं लवणस्याकारणमित्य दृष्टांतः ६

टी १ न ३ स्थितिकाले ४

गौणं दत्तमंजसं । अथ येदंतगदपीतावपि लिंगक्रमेव परेण ब्रह्मणावतिष्ठेत एवमप्यपीतिश्च न संभवति कारणाद्व्यतिरिक्तं च कार्यं न संभवती
वासमंजस्यमेवेति । अत्रोच्यते नैकिंचिदसामंजस्यमस्ति यत्तावदभिहितं कारणमपिगच्छत्कार्यं कारणमात्मीयेनेति ॥ न तु दृष्टांतभावात् ॥
नैवास्मदादीनां धर्मेण दूषयेदिति तददूषणं । कस्माद्दृष्टांतभावात् । संति हि दृष्टांताः ॥ यथा कारणमपिगच्छत्कार्यं कारणमात्मीयेन धर्मेण
का न दूषयति । तत्र यथा शरावादयो मृत्प्रकृतिविकारा विभागावस्थायां पुनरुच्चावचमध्यमप्रभेदाः संतः पुनः प्रकृतिमपिगच्छंतो न तामात्मी
येन धर्मेण संसृजंति । रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजंति । पृथिवीविकारश्चतुर्विधो भूतग्रा
मो न पृथिवीमपीतौ आत्मीयेन धर्मेण संसृजति । त्वत्पक्षस्य तु न कश्चिद्दृष्टांतोस्ति । अपीतिरेव हि न संभवेत् यदि कारणे कार्यं स्वधर्मेणा
वतिष्ठेत । अनन्यत्वेपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वं आरंभणशब्दादिभ्य इति वक्ष्यामः । अत्यल्प
मिदमुच्यते । कार्यमपीतावात्मीयेन धर्मेण कारणं संसृजेदिति । स्थितावपि हि समानोयं प्रसंगः । कार्यकारणयोरनन्यत्वाभ्युपगमात्
इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं ब्रह्मैवेदममृतं पुरस्तादिति सर्वं खल्विदं ब्रह्मेत्येवमाद्याभिः श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य
कारणादनन्यत्वं श्राव्यते तेन यः परिहारः कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इत्यपीतावपि स समानः । अस्ति
चायमपरो दृष्टांतः यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते अवस्तुत्वादेवं परमात्मापि संसारमायया न संस्पृश्यत

अ १ तस्य ब्रह्मात्मत्व प्रतिपत्ति पं १ [illegible]

यथा न कार्यस्य रूपेण सदसत्त्वाभ्यां निर्वचनं । किं अपि तु कारणस्वरूपेण शक्यं सत्त्वेन निर्वक्तु ५ मिथ्या स्यात्कार्यम् कालत्रयेऽपि कारणात्मना सदं अविरुद्धमिति भावः
मिति एवं च कारणसत्त्वेन कार्यस्य सत्त्वात् तेनोक्तं कथं तद् उक्तं प्राक् सति कारणे ... स्वरूपेण ... प्रागुत्पत्तेः ... सतो बोल्ल... रिति निर्वि
यमः सत्कार्यवादप्रतिषेध इत्यर्थः ४

स्वविरुद्धकारणात्मनाऽसत्त्वायोगादि सदभिप्रायः २

श्री. स्य प्रागभावत्वम् ... तेन कारणे ... तत्सद्भवति ... प्रतिषेधमात्रत्वात् ॥ यदि ... दृष्टाद्दिहानं ...

७ ते ... परितस्यापि ... शब्दादिमतस्तत्कार्यस्य कारणे मिथ्येति । असत्त्वे हि कार्यप्रागुत्पत्तेः ... प्रसज्येत । अनिष्टं चैतत् ... कार्यं न

दिनत्वे ... प्रतिषेधमात्रत्वात् ... मात्रं ... नास्य ... प्रतिषेधमस्ति । न ... प्रतिषेधप्रागुत्पत्तेः सत्त्वेऽ

र्थस्य प्रति ... कथं ... इदानीम ... कार्यं कारणात्मना सदेव प्रागुत्पत्तेरपीति गम्यते । न ... इदानीमपीदं कार्यं कारणात्म

नमेतेन ... नास्ति । सर्वं ते परादायान्यत्र ... नः सर्वं ... कारणात्मना तु सत्त्वे कार्यस्य प्रागुत्पत्तेर विशिष्टं ...

... जगतः कारणे ... शब्दादिमत्कार्यं कारणे ... प्रागुत्पत्तेरिदानीं वास्ति ... प्रागुत्पत्तेरसत्कार्य ...

मिथ्यात्वं ५ विस्तरेणाचैतत्कार्यकारणानन्यत्वं ... ॥ ... यदि ... वयवत्वाचेतनत्वप ...

त्वात् ... कार्यस्य कारणत्वमभ्युपगम्यते तत् ... प्रतिसंसृज्यमाने कार्ये ... विभागमापद्यमाने कारणे ...

ये ... दित्यपि तो कारणस्यापि ... कार्यस्य ... रूपप्रसंगात् । सर्वं ... जगतः कारणमिति ... मिदमेव

मिथ ... समस्तस्य विभागस्याविभागप्राप्तौ पुनरुत्पत्तौ नियमकारणाभावात् ... भोग्यादिविभागेनोत्पत्तिर्न प्राप्नोति राम.

सर्वं ... परेणात्र ... विभागे ... कर्मादि ... पुनरुत्पत्ता ... विपुनरुत्पत्ति ७

... लीसमानं ... इत्यर्थः । विभक्तस्य कर्मादि ... इत्यर्थः १०

मिथ्यात्वमन... रूपप्रक... ति...

श्रेष्ठा विज्ञानामतिरेषा तर्केण नापनेया न प्रापणीया । यद्वा कुतर्केण नापनेया मा निरस्या न भवति हि हे प्रेष्ठ प्रियतमेति नचिकेतः संमतिम् सोऽर्ववनं । कोहि त्वत्सम वक्तार भमोऽभ्यासाद् हि कोण
न त्वयो ऽन्य प्रायो वदित्यर्थः । छांदसो दीर्घ लोपः । प्रत आत्मनः सकाशाद् भिन्नविधास्त्रीहिर्व भवुस एवात्र व २ सूर्य वे त्रौ ५ दृना न्यद्इति मंत्र प्रतीकयोऽर्थः ।

अनन्यदृष्ट गोचरः । लिंगाद्यभावाच्च नानुमानादीनां । आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् तान्यथा चक्रतिः । नैषा तर्केणाम
तिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति । को अद्धा वेद क इह प्रवोचत् कुत आ जाता कुत इयं विसृष्टिः इयं विसृष्टिर्यत आ बभूवेति वेतो मंत्रो सिद्धानामीश्वराणां दुर्बोधतां
जगत्कारणस्य दर्शयतः । स्मृतिरपि भवति । अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति । अप्रमेयोऽयमचिंत्योऽयमविकार्योऽयमु
च्यत इति । न मे विदुः सुरगणाः प्रभवं न महर्षयः । अहमादिर्हि देवानां महर्षीणां च सर्वशः इति चैवं नातीय का द्वैविध्यवत्वाच्च इति
रकेण मननं विदधृष्ठ वद एव तर्केण प्रपादन्त्रे वो दर्शयतीत्यकं ज्ञानेन निर्विराश्रयः तर्केऽस्यात्मनाम्भः संभवति अननुगृहीतस्य
वस्य तत्र तर्को ऽनवागत्वेनाप्राप्यते स्वप्रमातृ बुद्धि प्रयोजक पौरिनरेतरव्याप्तिर्वारादात्मनोऽनन्वागतत्वे । संप्रसादेव प्रपंचपरि
त्यागेन सदात्मनावस्थाने निःप्रपंच सदात्मत्वात् प्रपंचस्य ब्रह्मस्य प्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्मणाव्यतिरेकत्वस्येवं ज्ञानाय
कल्पितकार्याप्रतिष्ठानादि मिच केवलस्य तर्कस्य विप्र । नेमकतत्वे प्रदर्शयिष्यति । योऽपि चेतनकारणवादी अवगत्वेनैव समस्तस्य जगतश्च
चेतनता मुक्तं चेत्तस्यापि विज्ञाने वाविज्ञाने चेतिचेतन्यावेतन विभागश्च करणं विभावनाविभावनाभ्यां चेतनाप्यस्य शक्यत एव योग्यविदि
तः । परस्यैव त्विदमपि विभागश्रवणं न युज्यते । कथं परमकारणस्य ह्येवसमस्त जगदात्मना समवस्थाने श्रूयते विज्ञानं चाविज्ञानं
चाभवदिति तत्र च परायेन नस्यावेतनभावो नोपपद्यते विलक्षणत्वादेवमवेतनस्यापि चेतनभावो नोपपद्यते प्रत्यक्तत्वानुवेदनरूपस्य

श्री॰ ६ शनखादीनामुत्पत्तिरचेतनत्वेन च प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनां । नन्वचेतनस्यैव पुरुषादिशरीरस्याचेतनानां केशनखा
दीनां कारणत्वमचेतनस्यैव च वृश्चिकादिशरीरस्याचेतनानां गोमयादीनां कार्यत्वमिति । उच्यते । एवमपि किंचिदचेतनं
चेतनस्यायतनभावमुपगच्छति किंचिन्नेत्यस्त्येव वैलक्षण्यं महांश्चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादी
नां च रूपादिभेदात् । तथा गोमयादीनां वृश्चिकादीनां च । अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रलीयेत । अथोच्यते । अस्ति क
श्चित्पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां च वृश्चिकादिष्विति । ब्रह्मणोऽपि तर्हि सत्तालक्ष
णः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते । विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दूषयता किमशेषस्य ब्रह्म
श्री स्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते । उत यस्य कस्यचिदथ चैतन्यस्येति वक्तव्यं । प्रथमे विकल्पे समस्तप्रकृतिविका
रोच्छेदप्रसंगः । न ह्यसत्यतिशये प्रकृतिविकार इति भवति । द्वितीये चासिद्धत्वं । दृश्यते हि सत्तालक्षणो ब्रह्मस्वभाव आका
दिष्वनुवर्तमानः । तृतीये तु दृष्टांताभावः । किं हि यच्चैतन्येनानन्वितं तदब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदाह्रियेत
समस्तवस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात् । आगमविरोधस्तु प्रसिद्ध एव चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यागमता रामः
त्पर्यस्य प्रसाधितत्वात् । यत्तूक्तं परिनिष्पन्नत्वाद्ब्रह्मणि प्रमाणांतराणि संभवेयुरिति तदपि मनोरथमात्रं । रूपाद्यभावाद्धि नायमर्थः ६

यावल्लौकिकस्वभावः प्रथमविकल्पार्थः सामान्याभावो द्वितीयविकल्पार्थः चैतन्यस्वभावस्तृतीयविकल्पार्थः ५

त्याभूतेन्द्रियाणांचेतनत्वमाशंकनीयं।यतोभिमानिव्यपदेशएषः मृदाद्यभिमानिन्योवागाद्यभिमानिन्यश्चचेतनादेवताव
दनसंवदनादिषुचेतनोचितेषुव्यवहारेषुव्यपदिश्यंतेनभूतेन्द्रियमात्रं।कस्मात्।विशेषानुगतिभ्यां।विशेषोहिभोक्तॄणांभूतेन्द्रि
याणांचचेतनाचेतनप्रविभागलक्षणःप्रागभिहितःसर्वचेतनतायांचासौनोपपद्येत।अपिचकौषीतकिनःप्राणसंवादेकरण
मात्राशंकाविनिवृत्तयेधिष्ठातृचेतनपरिग्रहायदेवताशब्देनविशिंषंति।एताहवैदेवताअहंश्रेयसेविवदमानाइतितावाएताः
सर्वादेवताःप्राणेनिःश्रेयसंविदित्वेतिच।अनुगताश्चसर्वत्राभिमानिन्यश्चेतनादेवतामंत्रार्थवादेतिहासपुराणादिभ्योवग
ग म्यंते।अग्निर्वाग्भूत्वामुखंप्राविशदित्येवमादिकाचश्रुतिःकरणेष्वनुग्राहिकांदेवतामनुगतांदर्शयति।प्राणसंवादवाक्यशेषेच
तेहप्राणाःप्रजापतिंपितरमेत्योचुरितिश्रेष्ठनिर्द्धारणायप्रजापतिगमनंतद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यांप्रा
णश्रेष्ठप्रतिपत्तिस्तस्मैबलिंहरंतीतिचबलिहरणंएवंजातीयकोस्मदादिष्विवव्यवहारोनुगम्यमानोभिमानिव्यपदेशंद्रढयति
तत्तेजऐक्षतेत्यपिपरस्याएवदेवतायाअधिष्ठात्र्याःस्वविकारेष्वनुगतायाअयमीक्षणव्यपदेशइतिद्रष्टव्यं।तस्माद्विलक्षणमे
वेदंब्रह्मणोजगत्।विलक्षणत्वाच्चनेदंब्रह्मप्रकृतिकमित्याक्षिप्तेप्रतिविधत्ते॥ ॥दृश्यतेतु॥तुशब्दःपक्षंव्यावर्तयति।यदु
क्तंविलक्षणत्वान्नेदंजगद्ब्रह्मप्रकृतिकमितिनायमेकांतः।दृश्यतेहिलोकेचेतनत्वेनप्रसिद्धेभ्यःपुरुषादिभ्योविलक्षणानांके

मी॰
५

नामप्यात्मनोस्त्यापमूर्छाद्यवस्थासु चैतन्यं न तु विभाव्यते एवं काष्ठलोष्टादीनामपि चैतन्यं न विभाव्यते। एतस्मादेव विभावितत्त्व
विभावितत्त्वहेतोर्विशेषाद्रूपादिमात्राभावाभावाभ्यां च कार्यकारणतानामात्मनो चैतन्यत्वाविशेषे विगुणप्रधानभावेन विरोत्स्यते
यथा च पार्थिवत्वाविशेषेपि मोदकसूपौदनादीनां शक्तिमद्वर्त्तिनो विशेषात्परस्परोपकारित्वं भवति एवमिहापि भविष्यति। पार्थिव
प्रासादस्य तदेव न विरोत्स्यत इति। ननु विकल्पे चिद्विवर्तिना चेतनत्वलक्षणं विलक्षणत्वं परिक्रियेत क्षिप्यते मुक्तिलक्षणं।
तु विलक्षणत्वं नैव परिक्रियते। न चेतरदपि विलक्षणत्वंप विहेतुः शाक्यतद्गताहतनयालोचनशब्दादिति। अनवगम्यमाने
वहीदृशो के समस्तस्य वस्तुनश्चेतनत्वं चेतनमपि तिवनवर्गात् शब्दशरणतया केवलया भिप्सितेः। तत्र शब्देनैवादि
त्यपतोः शब्दादपि तथात्वमवगम्यते तत्त्वान्यमिति प्रकृतिविलक्षणत्वे कथयति। द्रव्यविज्ञानं चाविज्ञानं चेति वस्यति द्वि
ईभागस्याचेतनत्वाश्रवणं चेतनाद्भूतसंविलक्षणमचेतनं जगत्प्रपञ्चयति। ननु चेतनत्वमपि क्वचिद्चेतनत्वाभिमतानां
मेतेन्द्रियाणां श्रूयते यथा मृदब्रवीदापोऽब्रुवन्निति। तत्रैव तेजस्तत्ता आपइत्येतेति चैवमाद्यास्तु विषयाचेतनत्वश्रुतिः।
इन्द्रियविषयापि तेहि ... प्राणाः अहंश्रेयसे विवदमाना ब्रह्म जग्मुरिति तेह वाचमूचुस्त्वं न उद्गायेति इत्याद्या इन्द्रियविषयेति। राम
नन्वनेन प्राप्ते। ॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्॥ तु शब्दः आशङ्कामपनुदति न खल्वमृदब्रवीदित्येवंजातीयकया श्रु ५

नि

मिश्रेय मारो जगद्विलक्षणमचेतनमशुद्धं चेष्यते ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं चेष्यते । न च विलक्षणत्वे प्रकृतिविकारभावो
दृष्टः न हि रुचकादयो विकाराः मृत्प्रकृतिका भवंति शरावादयो वा सुवर्णप्रकृतिकाः । मृदैव तु मृदन्विता विकाराः प्रक्रियंते सुवर्णेन च सुव
र्णान्विताः । तथेदमपि जगदचेतनं सुखदुःखमोहान्वितं सदचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हति न विलक्षणस्य ब्र
ह्मणः । ब्रह्मविलक्षणत्वं चास्य जगतोऽशुद्ध्यचेतनत्वदर्शनादवगंतव्यं । अशुद्धं हीदं जगत्सुखदुःखमोहात्मकतया प्रीतिपरितापविषा
धु दादिहेतुत्वात् स्वर्गनरकाद्युच्चावचप्रपंचत्वाच्च । अचेतनं चेदं जगत् चेतनं प्रति कार्यकरणभावेनोपकरणभावोपगमात् । न हि सा
म्ये सत्युपकार्योपकारकभावो भवति । न हि प्रदीपौ परस्परस्योपकुरुतः । ननु चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपक
रिष्यति । न । स्वामिभृत्ययोरप्यचेतनांशस्यैव चेतनं प्रत्युपकारकत्वात् । यो ह्येकस्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतनभागः स एवान्य
स्य चेतनस्योपकरोति न तु स्वयमेव चेतनश्चेतनांतरस्योपकरोत्यपकरोति वा । निरतिशया ह्यकर्तारश्चेतना इति सांख्या मन्यं
ते । तस्मादचेतनं कार्यकरणं । न च काष्ठलोष्टादीनां चेतनत्वे किंचित् प्रमाणमस्ति । प्रसिद्धश्चायं चेतनाचेतनप्रविभागो लोके । त
स्माद् ब्रह्मविलक्षणत्वान्नेदं जगत्तत्प्रकृतिकं । योऽपि कश्चिदाचक्षीत श्रुत्वा जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेत
नमवगमयिष्यामि प्रकृतिरूपस्य विकारेऽन्वयदर्शनात् अविभावनं तु चैतन्यस्य परिणामविशेषाद्भविष्यति यथा स्पष्टचैतन्या

मी॰ ४ ररणानि चक्षुतिबन्ध्यानि। नान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत् उपकुर्वन्तु नाम। तत्त्वज्ञानं तु वेदान्तवा
क्येभ्य एव भवति। नावेदविन्मनुते तं बृहन्तं। तं त्वौपनिषदं पुरुषं पृच्छामि इत्येवमादिश्रुतिभ्यः॥ न विलक्षणत्वादस्य
न तथात्वं च शब्दात्॥ ब्रह्मास्य जगतः कारणं प्रकृतिश्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतस्तर्कनिमित्त इदा
नीमाक्षेपः परिह्रियते। कुतः पुनरस्मिन्नवधारित आगमार्थे तर्कनिमित्तस्याक्षेपस्यावकाशः। ननु धर्म इव ब्रह्म
ण्यप्यनपेक्ष आगमो भवितुमर्हति। भवेदयमवष्टम्भो यदि प्रमाणान्तरानवगाह्य आगममात्रप्रमेयोयमर्थः स्यात्।
अनुष्ठेयरूप इव धर्मः। परिनिष्पन्नरूपं तु ब्रह्मावगम्यते। परिनिष्पन्ने च वस्तुनि प्रमाणान्तराणामस्त्यवकाशः। यथा
पृथिव्यादिषु। यथा च श्रुतीनां परस्परविरोधे सत्येकवशेनेतरा नीयन्ते। एवं प्रमाणान्तरविरोधेपि तद्वशेनैव श्रुति
र्नीयेत। दृष्टसाम्येन चादृष्टमर्थं समर्थयन्ती युक्तिरनुभवस्य संनिकृष्यते। विप्रकृष्यते तु श्रुतिरैतिह्यमात्रे
ण स्वार्थाभिधानात्। अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनं च दृष्टफलतयेष्यते। श्रु
तिरपि श्रोतव्यो मन्तव्य इति श्रवणव्यतिरेकेण मननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति। अतस्तर्कनिमित्तः पुनराक्षेपः क्रि राम:
यते। न विलक्षणत्वादस्येति। यदुक्तं चेतनं ब्रह्म जगतः प्रकृतिरिति तन्नोपपद्यते। कस्मात् विलक्षणत्वादस्य विकारस्य प्रकृत्याः इदं हि ब्रह्मकार्यत्वेना ॥

यो१ व नृ ६१ नृ१

योग इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते । अतः संप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिर
प्यनपवदनीया भविष्यतीति । इयमप्यधिकाशङ्कातिदेशेन निवर्त्यते । अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रति
पत्तेः पूर्वोक्ताया दर्शनात् । सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः । सां
ख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ शिष्टैश्च परिगृहीतौ लिङ्गेन च श्रौतेनोपबृंहितौ । तत्कारणं सां
ख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैरिति । निराकरणं तु न सांख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रे
द यसमधिगम्यत इति । श्रुतिर्हि वैदिकादात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनं वारयति । तमेव विदित्वातिमृत्यु
स्य मेति नान्यः पन्था विद्यतेऽयनायेति । द्वैतिनो हि ते सांख्या योगाश्च नात्मैकत्वदर्शिनः । यत्तु दर्शनमुक्तं तत्कारणं सांख्य
योगाभिपन्नमिति वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते प्रत्यासत्तेरित्यवगन्तव्यं । येन
त्वंशेन न विरुध्येते तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वं । तद्यथा असङ्गो ह्ययं पुरुष इत्येवमादिश्रुति
सिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरनुगम्यते । तथा योगैरपि अथ परिव्राड्विवर्णवा
सा मुण्डोऽपरिग्रह इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते । एतेन सर्वाणि तर्क

मुं१ द्२ क्ष

मी·
३

त्यनवकाशप्रसंगोऽन्यदोषः ॥ ॥ इतरेषां चानुपलब्धेः ॥ ॥ प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ क
ल्पितानि महदादीनि न तानि लोके वेदे वोपलभ्यन्ते । भूतेन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वाच्छक्यन्ते स्मर्तुं अलोक
वेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते । यदपि क्वचित्तत्परमिव श्रवणमवभासते तदप्य
तत्परं व्याख्यातमानुमानिकमप्येकेषामित्यत्र । कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्रा
व यः । तस्मादपि न स्मृत्यनवकाशप्रसंगो दोषः । तर्कावष्टंभं तु न विलक्षणत्वादित्यारभ्योत्तरं विवरिष्यति ॥ ॥ एतेन योगः
प्रत्युक्तः ॥ ३ ॥ एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति तत्रापि श्रुतिवि
रोधेन प्रधानं स्वतंत्रमेव कारणं महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यन्ते । नन्वेवं सति समानन्यायत्वात्पू
र्वेणैवैतद्गतं किमर्थं पुनरतिदिश्यते । अस्ति ह्यत्राभ्यधिकाशंका सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः श्रोतव्यो
मन्तव्यो निदिध्यासितव्य इति । त्रिरुन्नतं स्थाप्य समं शरीरमित्यादिना चासनादिकल्पनापुरःसरं बहुप्रपंचं योग
विधानं श्वेताश्वतरोपनिषदि दृश्यते । लिंगानि च वैदिकानि योगविषयाणि सहस्रश उपलभ्यन्ते । तां योगमिति स्थिराम·
मन्यन्ते [illegible]न्द्रियधारणामिति विद्यामेतां योगविधिं च कृत्स्नमिति चैवमादीनि । योगशास्त्रेऽपि अथ तत्त्वदर्शनोपायो ३

भ्रि·१ [illegible] २४ [illegible]
[illegible] धारणां योगविदो श्रु [illegible] पा ६४ ३ [illegible] ५
[illegible]

प्राप्तिरहितस्यासाधकत्वात्। भवति चान्या मनोर्माहात्म्यं प्रख्यापयंती श्रुतिः। यद्वै किंच मनुरवदत्तद्भेषजमि-
ति मनुना च सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छतीति। सर्वात्मत्वदर्शि-
नं प्रशंसता कापिलं मतं निंद्यत इति गम्यते। कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते। आत्मभेदाभ्युपगमा-
त्। महाभारतेपि बहवः पुरुषा ब्रह्मन्नुताहो एक एव त्विति विचार्य बहवः पुरुषा राजन्सांख्ययोगविचारिणामि-
ति परपक्षमुपन्यस्य तद्व्युदासेन च बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्या-
मि गुणाधिकमित्युपक्रम्य ममांतरात्मा तव च ये चान्ये देहसंस्थिताः सर्वेषां साक्षिभूतोसौ न ग्राह्यः केन चि क्चि
चित्। विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति भूतेषु स्वैरचारी यथासुखमिति। सर्वात्म-
तैव निर्धारिता। श्रुतिश्च सर्वात्मतायां भवति। यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शो-
क एकत्वमनुपश्यत इत्येवंविधा। अतश्चात्मभेदकल्पनयापि कपिलस्य तंत्रं वेदविरुद्धं वेदानुसारिमनुवचन विरुद्धं च
न केवलं स्वतंत्रप्रकृतिपरिकल्पनयैवेति। वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये। पुरुषवचसां तु
मूलांतरापेक्षं वक्तृस्मृतिव्यवहितं चेति विप्रकर्षः तस्माद्वेदविरुद्धविषये स्मृत्यनवकाशप्रसंगो न दोषः। कुतश्च स्मृ-

तस्माद्दुर्बलाः स्वकारणात् व्यक्तं मायया पीत्वा नंसृ प्रमाणकऽ अगदिति यावत् ४ प्रभवत्यस्मादिति प्रभवो जन्महेतुः प्रलीयतेऽस्मिन्निति प्रलयः
लयाधिष्ठानं ६
तस्मात्कर्तृत्वप्रवर्तकाः अस्मादयः प्रभवन्ति स एव मूलमुपादानं किं परिणामि नेत्याह शाश्वतिकः कूटस्थः अतः स नित्य इत्यर्थः ७
तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः ॥ तस्य समाधिः । नान्यस्मृत्यनवकाशदोषप्रसंगादि-
ति । यदि स्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवाद आक्षिप्येतैवमप्यन्या ईश्वरकारणवादिन्यः ॥ स्मृतयोऽ-
नवकाशाः ॥ प्रसज्येरन् ता उदाहरिष्यामः ॥ यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स ह्यन्तरात्मा भूतानां क्षे-
त्रज्ञश्चेति चोक्त्वा तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्याह । तथान्यत्रापि अव्यक्तं पुरुषे ब्रह्म-
न्निर्गुणे संप्रलीयत इत्याह । अतश्च संक्षेपमिमं शृणुध्वं नारायणः ॥ सर्वमिदं पुराणः ॥ स सर्गकाले च करोति स-
र्वं संहारकाले च तदत्ति भूय इति पुराणे भगवद्गीतासु च । अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति परमात्मा-
नमेव प्रकृत्यापस्तम्बः पठति । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः ॥ स नित्य इत्येवमनेकशः स्मृति-
ष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्या-
मीत्यतोऽयमन्यस्मृत्यनवकाशोपन्यासः । दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं । विप्रतिपत्तौ च
स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणं अनपेक्ष्या इ-
तराः ॥ तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति । न चातीन्द्रियानर्थान् श्रुति-
मन्तरेण कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावात् । शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञानत्वा-
न दिति चेत् सिद्धेरपि सापेक्षत्वात् । धर्मानुष्ठानापेक्षा हि सिद्धिः ॥ स च धर्मश्चोदनालक्षणः ॥ ततश्च पूर्वसिद्धा-
याश्चोदनाया अर्थो न पश्चिमसिद्धपुरुषवचनवशेनातिशंकितुं शक्यते सिद्धव्यपाश्रयकल्पनायामपि
बहुत्वात्सिद्धानां प्रदर्शितेन प्रकारेण स्मृतिविप्रतिपत्तौ सत्यां न श्रुतिव्यपाश्रयादन्यन्निर्णयकारणम-
स्ति मन्वादिविरोधे स्मृतिप्रामाण्यं अपेक्षाम् अन्यहेयमिति यावत् । असतोऽसति विरोधेऽनुमानं मूलश्रुतेर्गमकमिति जैमिनिसूत्रार्थः ५

क्तापरतंत्रप्रज्ञस्यापि नाकस्मात्स्मृतिविशेषविषयः पक्षपातो युक्तः। कस्यचित्क्वचित्पक्षपाते सति पुरुष
मतिवैश्वरूप्येण तत्वाव्यवस्थानप्रसंगात् तस्मात्तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसारा
ने नुसारविवेचनेन सन्मार्गे प्रज्ञा संग्रहणीया। या तु श्रुतिः कपिलस्य ज्ञानातिशयं दर्शयंती प्रदर्शि
ता न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यं। कपिलमिति श्रुतिसामान्यमात्रत्वादन्यस
च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणादन्यार्थदर्शनस्य च

[illegible] तदेव नाम [illegible] तत्र [illegible] नामानि [illegible] [illegible] समुदाय [illegible] मनस्य [illegible] [illegible] इति [illegible]
[illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] इति [illegible] नेति

समुदायरूपमहेतुकं [illegible] वैशेषिकस्य [illegible] परिमाण [illegible] [illegible] स्वामि [illegible] वैनाशिकः सर्वत्र [illegible]
नाशिका [illegible] वैनाशिक वैशेषिकमतनिराकरणानन्तरं [illegible] वैनाशिकमतं [illegible] [illegible] [illegible]
नो वैभाषिकस्यौपनिषदिक [illegible] [illegible] प्रतिपत्ति [illegible] [illegible] तत्र वैभाषिक [illegible] [illegible]
समभूताः [illegible] वैभाषिकस्य [illegible] पदार्थाः [illegible] [illegible] [illegible]
[illegible] [illegible] प्रमाण [illegible] इति [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] समुदायः [illegible] हेतुक [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] आध्यात्मिक [illegible] हेतुक [illegible] वैभाषिक [illegible] समुदाय [illegible] हेतुके [illegible] [illegible] हेतुके
[illegible] समुदाये [illegible] परमाणुहेतुके [illegible] समुदाये [illegible] हेतुके वा [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] समुदाय [illegible] [illegible] [illegible] [illegible] संघात [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] कारणवचनः [illegible] [illegible]
[illegible] [illegible] हेतुः समवसंस्कारा [illegible] [illegible] [illegible] कारणभूतं [illegible]

तं यस्तं मुपादः तेनेत्यात्मने नेति नं ते शास्त्रं कपिलोक्तं ७ [illegible] सतुर्थे लिंगशरीर[illegible]नासविरोधः

अध्याय २

श्रीगणेशाय नमः ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ प्रथमेध्याये सर्वज्ञः सर्वेश्व
रो जगत उत्पत्तिकारणं मृत्सुवर्णादय इव घटरुचकादीनां उत्पन्नस्य जगतो नियंतृत्वेन स्थितिकारणं मायावीव मायायाः प्र
सारितस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणमवनिरिव चतुर्विधस्य भूतग्रामस्य स एव च सर्वेषां न आत्मेत्येतद्वे
दांतवाक्यसमन्वयप्रतिपादनेन प्रतिपादितं प्रधानादिवादाश्च अशब्दत्वेन निराकृताः ॥ इदानीं स्वपक्षे स्मृतिन्यायविरो
धपरिहारः प्रधानादिवादानां च न्यायाभासोपबृंहितत्वं प्रतिवेदांतं च सृष्ट्यादिप्रक्रियाया अविगीतत्वं एतस्यार्थजा
तस्य प्रतिपादनाय द्वितीयोध्याय आरभ्यते तत्र प्रथमं तावत्स्मृतिविरोधमुपन्यस्य परिहरति । यदुक्तं ब्रह्मैव जगतः
कारणमिति तदयुक्तं कुतः स्मृत्यनवकाशदोषप्रसंगात् । स्मृतिश्च तंत्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता अन्याश्च
तदनुसारिण्यः स्मृतयः एवं सत्यनवकाशाः प्रसज्येरन् तासु ह्यचेतनं प्रधानं स्वतंत्रं जगतः कारणमुपनिबध्यते । म
न्वादिस्मृतयस्तावच्चोदनालक्षणेन अग्निहोत्रादिधर्मजातेनापेक्षितमर्थं समर्पयंत्यः सावकाशा भविष्यंत्यस्य वर्णस्यास्मि
न्काले अनेन विधानेनोपनयनमीदृशश्चाचार इत्थं वेदाध्ययनं इत्थं समावर्तनं इत्थं सहधर्मचारिणीसंयोग इति । तथा पु
रुषार्थांश्च वर्णाश्रमधर्मान्नानाविधान्विदधति नैवं कापिलादिस्मृतीनामनुष्ठेये विषये अवकाशोस्ति मोक्षसाधनमेव
हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवासां प्रसज्येत तस्मात्तदविरोधेन
वेदांता व्याख्यातव्याः कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवका
शदोषप्रसंगेन पुनराक्षिप्यते भवेदयमनाक्षेपः स्वतंत्रप्रज्ञानां परतंत्रप्रज्ञास्तु प्रायेण जनाः स्वातंत्र्येण श्रुत्यर्थमवधार
यितुमशक्नुवंतः प्रख्यातप्रणेतृकासु स्मृतिष्ववलंबेरन् तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन् अस्मत्कृते च व्याख्याने न विश्वस्युः
बहुमानात्स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते श्रुतिश्च भवति ऋषिं प्रसूतं कपिलं यस्त
मग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति तस्मान्नैषां मतमयथार्थं शक्यं संभावयितुं तर्कावष्टंभेन चैते अर्थं प्रतिष्ठापयंति १

[illegible] यमानं च कपिलं जनयेत् ऋषिं प्रसूतं बिभर्ति [illegible] स्वातंत्र्येण [illegible] सांख्य [illegible] पुरुष [illegible]
तत्परे परमेश्वरमिति [illegible] २

[illegible] कपिलनामानं [illegible] तिकाले [illegible] समीरण [illegible]